श्रीः

वाल्मीकिरामायणान्तरार्थदीपिका

श्रीभागवतपौराणिकाग्र्यात्तुरैशास्त्रिप्रणीता

तदीयव्ययेनैव मुद्रापणपूर्वकं प्रकटीकृता

विज्ञानचिन्तामणिमुद्राशाला

पट्टाम्पि

ए-रामशर्मणा मुद्रापिता

१९०३

मूल्यं कलाष्टकं ८

शुद्धिपत्रिका

भागः	पंक्तिः	अशुद्धिः	शुद्धिः
९	१५	गरुणा	गुरुणा
१४	१३	देहमवा	देहमेवा
१५	७	ब्रह्मण्ड	ब्रह्माण्ड
१६	५	कशला	कुशला
१८	१०	कम	काम
२०	१९	शोशब्द	गोशब्द
२६	४	ब्रह्मसा	ब्रह्मरसा
२७	२०	केय्यात	केय्या तस्मिन्नेवन्यस्तौ त
४९	४	यज्यत	युज्यत
,,	१५	आनयेत्	आनाय्य
५०	३	भाग्यव	भाग्यवा
५३	७	किन्त	किन्तु
,,	१६	हादर	होदर
५७	३	केष	केषा
,,	५	णनजो	णानुजो
६०	५	धन	धनु
६४	१७	ब्रह्मण	ब्राह्मण

शुद्धपत्रिका

भागः	पंक्तिः	अशुद्धिः	शुद्धिः
६९	१	त्वयाच्य	त्वयेाच्य
,,	६	पशवो- सुवना	पशवो ग्नप्याः वार्च्यमा— विश्वा सुवना
,,	११	स्वात्मप्ये	स्वात्माप्ये
७१	१२	त्यत्रसन्देहः	त्यत्रन सन्देहः
७३	१	स्यद्वैत	स्याद्वैत
७४	१२	प्यनद्दत्य	प्यनाद्दत्य

श्रीरामो जयतु

वाल्मीकिरामायणान्तरार्थदीपिका

श्रीभागवतपौराणिकाद्यान्यतरै-

शास्त्रिप्रणीता

अस्याः कृतेर्महद्भिर्दत्तान्यनुमोदनानि

१–अयि पौराणिकमौले! सम्यगवालोकि दीपिका सेयम। दूरीकरोति चेतस्तमोधुना किञ्च मोदमावहति। अहो भागवतपौराणिका भवदीयकृतावस्यां श्रीमद्वाल्मीकिरामायणान्तरार्थदीपिकायां भवद्भिरुपपादिता आन्तरार्थाः प्रमाणयुक्त्यनुभवरमणीया एव दरीदृश्यन्ते। बाह्यार्थेषु तु प्रायशः क्वचित् क्वचिल्लेशतस्सन्ति हि विरोधाः। सर्वेषामपि तेषां परिहारार्थमिमे आन्तरार्था अवश्योपयुक्ताश्चेति मन्यामहे। प्राचीनार्यैरप्रपञ्चितानां पुराणग्रन्थेष्वदृष्टानामप्येतेषामान्तरार्थानां सम्यगवलोकनावसरे प्रकृतग्रन्थप्रणेतॄणां तत्रभवतां समीक्ष्य निरंकुशप्रसरां कुशाग्रबुद्धिं वयमत्यन्तमनुमोदामहे। यद्यपीयं रामायणान्तरार्थदीपिका सहृदयहृदयाह्लादकारिणी दृश्यते। तथापि "सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः।" एतद्वचनानुरोधेन द्वैतविशिष्टाद्वैतमतनिराकरणप्रवृत्ततया ईषत्कळंकसंगतापीति प्रतिभाति। कळंकोप्ययमेतद्ग्रन्थकर्तृषु नानुबध्यत इति प्रकृतग्रन्थप्रतिपादितं विषयमुद्दिश्य किञ्चिदप्युपन्यस्तुमधुना न वयमभिप्रैमः। अपि तु रामायणक्षीरवारिधिपूरमखिलमालोड्य तत्सारभूतममृतमान्तरार्थमाविष्कुर्वतश्श्रीमद्भागवतपौरा-

णिकान् अय्यात्तुरैशास्त्रिणस्तत्रभवतस्सांप्रतं सप्रमोदमिह व-
यमभिनन्दामः । अत्रायं श्लोकः ।

श्रीमद्रामकथांबुराशिमथनेनासाद्य खेदापहं
सारार्थामृतमर्प्पयन् स विबुधश्रेण्यै सकौतूहलम
जीयादाशशिसूरतारकमयं पौराणिकाग्रेसरः
शास्त्री प्रौढकुशाग्रबुद्धिमहितस्सेयं मदभ्यर्थना ॥

१०७८ मकर २३
माङ्गाव
} मानविक्रमकविराजकुमारः

२—वाल्मीकिरामायणान्तरार्थदर्शिकपुस्तकस्मिन् श्रीभागवतपौराणिकेनाय्यात्तुरैशास्त्रिणा प्रतिपादितान्तरार्थाः प्रमाणयुक्त्यनुभवालंकृता एव शोभन्ते । पूर्वैरार्यैरनुक्तत्वात प्राचीनेषु ग्रन्थेष्वदृष्टत्वाच्च चित्तमोदमलभमाना अपि वयमस्य सूक्ष्मार्थग्रहणपटीयसीं बुद्धिमनुमोदामहे ।

कटत्तनाट्टकृष्णवर्ममहाराजाः

३—अद्वैतमतावलम्बिनामस्माकं पुराणेषु तत्र तत्र स्थूलदृष्ट्या दृश्यमानान् दोषकणान् निजमनीषाविशेषेण निर्मूलयितुमुद्यतानां प्रायेण प्राचीनाचार्यवर्यैरप्रपञ्चितानप्यान्तरार्थानज्ञजनानुग्रहबुद्ध्या बहिः प्रकाशयतां श्रीभागवत-पौराणिकाय्यात्तुरैशास्त्रिणां समुद्यममिमं को वा नाभिनन्देत।

अत्रायं श्लोकः

श्रीमद्भागवतार्थवक्तृबुधराजाय्यात्तुरैशास्त्रिणा
श्रीवाल्मीकिमहामुनीन्द्ररचितं रामायणांभोनिधिम् ।

॥ ३ ॥

मेधामन्दरभूधरेण नितरां निर्मत्थ्य निष्पादितं
गूढार्थामृतमद्य हृद्यमधिकं सन्तः पिबन्त्वादरात् ॥
उदयवर्मभैमिभूयुवराजः

४—मन्त्रीपौराणिकालोकमहानलभयादिदंमू❀ ।
सततं रक्षतु श्रीमत्सीतासुकृतमञ्जरी ॥
कोपि सहृदयः

❀ इदं । आन्तरार्थदीपिकापुस्तकम्

५—विद्वन्मौलिविराजमानमकुटालङ्कारचिन्तामणि-
रसद्वाल्मीकिमुखाब्जनिस्सृतमधु श्रीरामगीतां पिबन् ।
हृद्यन्ततत्परमार्थतत्वममृतं सत्सु प्रदानेच्छया
गद्यं योरचयत् स भूसुरवरो लोके विजेजीयते ॥ १ ॥
श्रीभागवतपौराणिकाय्यात्तुरमनीषिणा ।
रचितं रामगीतान्तरार्थं मधु पुनातु वः ॥
केरळवर्मनाम्ना पुरळीनृपेण लिखितामिदमनुमोदनम् ॥

६—वल्मीकभूरकृत रामकथां पुरासौ
सूक्ष्मन्तदर्थमपि किं प्रकटीकरिष्यन् ।
अय्यात्तुरैपरपदान्तरितोत्र शास्त्री
शास्त्री सतामुपकृतौ स्वयमाविरासीत् ॥
अबाधितं न्यायपथेन वेदवेदान्तपीयूषझरेण सिक्तम् ।
अय्यात्तुरैशास्त्रिमुनिप्रणीतं रामायणार्थं कलयन्तु सन्तः ॥
मणन्तलनीलकण्ठशर्मा बि—के—संस्कृतपण्डित·
तलश्शेरि

७—शुभमस्तु । श्रीमत्यतिगंभीरे प्राचेतसमुनिवर-प्रणीते अनन्तगूढार्थरत्नाकरे सरसे रामायणार्णवे प्रविष्टा बहवोन्तर्वाणयः त्रैवर्गिकभूयिष्ठं लोकमवगम्य तन्मतानुसारेण त्रिवर्गप्रधानान् अर्थमणीनेवोद्धृत्य यद्यपि प्राकाशयन् । तथाप्यधुना रामायणार्णवाधस्तलाधि निमग्नेन तादृशार्थ-मणिलाभमात्रेणापरितुष्यता अमृतत्वनिदानभूताद्वैतार्थरत्नम-णीनेवान्विष्यता पूर्वं श्रीभागवतपौराणिक इति करभूषणा-ङ्कनप्रार्थितेन इदानीं रामायणार्णवनिलीनाद्वैतार्थरत्नप्रकाश-क इत्यपि प्रसिद्धिं गतेनाय्यात्तुरशास्त्रिणा उद्धृत्य प्रकाशि-ता अद्वैतार्थमणयः ममेव सर्वेषां सहृदयानां हृदयानन्दस-न्दोहदायिनो भवन्तीत्यनुमोदामहे ॥

अत्रायं श्लोकः

गंभीरे बहुळार्थरत्ननिबिडे रामायणाब्धौ पुरा
प्राचीनैरवगाह्य भावमणयो बाह्या जयन्त्युद्धृताः ।
अय्याय्यात्तुरशास्त्रिणान्तरतमाद्वैतार्थरत्नान्यपि
सोद्धृत्य प्रतिपादितानि जनयन्त्यानन्दमग्नं मनः ॥

इदं कल्पादिग्रामवासिना अण्णय्यापरपर्यायेण चि-दम्बरेश्वरशास्त्रिणा लिखितमय्यात्तुरशास्त्रिप्रणीतरामायणा-न्तराद्वैतार्थानुमोदनम् ॥

८—रामायणान्तरार्थप्रदीपिकाहरतिनस्तमोन्तरिह
आर्याग्रण्यय्यतुरैसूर्याकालितेयमत्र किञ्चित्रम् ॥

इरिवेनाट्ट किलक्केटत्त कुञ्जिक्कण्णन्एळयनम्प्यार

श्रीरामो जयतु

वाल्मीकिरामायणान्तरार्थदीपिका

श्रीभागवतपौराणिकाग्र्यात्तुरशास्त्रिप्रणीतां

॥ अवतारिका ॥

श्रीमद्भागवतमहाभारताद्यार्यमतप्रमाणप्रतिपाद्यमानानां भूगोळादिसर्वविषयाणां इदानीमांग्लेयैस्तद्भाषानिपुणैः कैश्चिदार्यैरप्युच्यमानानाञ्च तेजस्तिमिरयोरिव परस्परविरुद्धता सर्वानुभवसिद्धैव । आंग्लेयैरुच्यमानान् निषिद्ध्यार्यमतप्रमाणप्रतिपाद्यमानान् सयुक्तिकं सानुभवञ्च स्थापयितुमार्यैरशक्यमेवेति विज्ञानचिन्तामण्यादिपत्रेषु बहूद्घुष्टमस्माभिः। किञ्च गोळात्मिकेयं भूमेराकाशे तिष्ठति । ज्योतिश्चक्रञ्चाकाशे भूमेरुपर्यधः प्रतिदिनं पश्चिमाभिमुखं सञ्चरतीति गोळाध्याये स्पष्टमेवोक्तम् । तथैवेदानीन्तनैः कार्तान्तिकैरप्युच्यते । तत्र निदर्शनञ्चन्द्रसूर्योपराग एव । एवञ्च श्रीमद्भागवतपञ्चमस्कन्धोक्तानां प्रत्येकायुतयोजनविस्ताराणां अतलादीनां सप्तपाताळलोकानां महानपलाप एवेत्याम्रेडितमस्माभिस्तत्रैव विज्ञानचिन्तामणिपत्रे । अपि च परिमितप्रमाणे गोळाध्यायोक्तमानलक्षणवति भगोळे लक्षद्विलक्षयोज-

नेत्याद्युपर्युपरिद्विगुणमानवतां सप्तद्वीपसप्तसमुद्राणामनवका-
श एव स्पष्टमवगम्यते । किञ्च प्रियव्रतरथचरणनेमिपरिखा-
तास्सप्त सिन्धव इति स्पष्टमुक्तं खलु पञ्चमस्कन्धे । हा हा
चतुष्षष्टिलक्षयोजनविस्तारचक्रयुतो रथ इति कथं घटेत? ।
तादृशरथारूढः प्रियव्रतस्तस्मिन् रथे निबद्धास्तुरगाश्च की-
दृशा इति वयं न विद्मः । आंग्लेयपरिहासास्पदत्वेनैवंविधा
युक्त्यनुभवविकला बहवो विषयास्सन्त्येव भागवतभारतादि-
पुराणेष्विति विज्ञानचिन्तामण्यादिग्रन्थेष्वस्माभिर्बहूपन्यस्तम-
पि सुचिरमूषरे वर्षितमेव ।

अयि महाशया आर्याः! ब्रह्मसूत्रदशोपनिषद्भगव-
द्गीताख्यवेदान्तशास्त्रेष्वद्वैतब्रह्मतत्वप्रतिपादकोतिगम्भीरो यो-
र्थः प्रतिपादितस्स एवार्थो भागवतभारतादिपुराणेष्वपि गं-
भीकृतो वर्तते । तादृशार्थस्फारकतयव भागवतभारतादिपु-
राणेषु बाह्यार्थो वर्ण्यते । न तु सत्यतयेति निर्विशयं मधु-
ष्टं ब्रूमो वयम् ।

किञ्च भागवतभारतादिपुराणानां अद्वैततत्वप्रतिपा-
दकतया व्यज्यमानान्तरार्थोयमयमित्यस्माभिर्यथामति पुस्त-
करूपेण विरच्य मुद्रापितः । अपि च श्रीमद्भागवतमहाभा-
रतादिपुराणान्तरार्थोस्माभिर्यथावगतस्तथा वाल्मीकिरामाय-
णान्तरार्थो नैवावगतः । आदिकाव्यत्वादतिगंभीरत्वाच्चास्य
रामायणस्य ।

॥ ३ ॥

अथेदानीं केरळेषु शिरश्श्रेण्याख्य(तलश्शेरि)पत्तने श्रीबृहद्वनवासिनं भगवन्तं दाशरथिं भजद्भिरस्माभिश्श्रीवाल्मीकिरामायणमर्त्थतो गीयते । अत्राद्वैतपरब्रह्मात्मकश्रीरामचन्द्रकृपया वाल्मीकिरामायणस्याप्यान्तरार्थोद्यावगतः । निरवधिकमहिमानं वाल्मीकिरामायणान्तरार्थं साकल्येन वक्तुं को वा शक्नुयात् । तथापि केषाञ्चिन्मुख्यविषयाणां यथामत्यान्तरार्थनिरूपणाय कयोश्चिद्विप्रयोस्संवादरूपेणेदं पुस्तकं विरच्यतेस्माभिः । ये तावदस्मिन् जन्मनि जन्मान्तरे वाप्यकृतसुकृतास्ते मामुन्मादिनं ब्रूयुरेव । तथापि मदुच्यमानान्तरार्थाश्श्रीरामचन्द्रकृपया महतामुन्मोदाय भवेयुरेवेति विश्वसिमो वयम् ।

अपि चास्मदुच्यमानान् श्रीवाल्मीकिरामायणान्तरार्थान् ये खण्डयिष्यन्ति तैर्महाशयैरार्यैः पुस्तकेस्मिंस्तत्र तत्र (—) एतदङ्कद्वयमध्यगतानां सर्वेषां विषयाणां समीचीनतया समाधानपुरस्सरं खण्डनं कर्तव्यम् । तदपि लेखनेनैव । न तु वाङ्मात्रेण । वाङ्मात्रखण्डनस्य सलिललिखितलिखिवदनन्तरक्षणविनाश्यत्वादिति सविनयं महद्भ्योर्पयामो नमश्शतानि ।

श्रीभागवतपौराणिकः अय्यात्तुरैशास्त्री

कल्लिक्कोट्टैं तळि

॥ श्रीगणेशो जयतु ॥

॥ श्रीवाल्मीकिरामायणान्तरार्थदीपिका ॥

श्रीभागवतपौराणिकाग्र्यैरशास्त्रिभिः प्रणीता.

क्षमन्तां साहसमिदं सन्तस्सन्तोषशालिनः ।
किञ्चास्माननुगृह्णन्तु गुणदोषविवेचकाः ॥ १ ॥
अज्ञानेन यदस्माभिरन्यद्धामिह भाष्यते ।
तदन्यदपि तत्सर्वं रामचन्द्रार्पणं भवेत् ॥ २ ॥
कर्मनिष्ठो द्विजः कश्चित् सत्यनिष्ठस्तथापरः ।
मानसे मण्डपे स्थित्वा संवादं चक्रतुर्मिथः ॥ ३ ॥

१—कर्मनिष्ठ उवाच । सखे सत्यनिष्ठ! कियतः कालात् पूर्वं केनचिदांग्लेयभाषाविदुषा रामायणपरिशोधनं नाम किमपि पुस्तकं कैरळ्या वाचा विरचितं मुद्रापितञ्च । तज्ज्ञवता दृष्टं किं? ॥

सत्यनिष्ठोब्रवीत् । मदीयाभिधानमुखविलसितं तत् पुस्तकं केनचिन्मह्यं प्रेषितम् । दृष्टमेवाम्मूलचूडं मया ॥

२ कर्मनिष्ठः । तत्र किं प्रतिपाद्यते । तद्विषये भवता किमभिप्रेतम् ॥

सत्यनिष्ठः । वाल्मीकिरामायणे अघटिता बहवो विषया विवृताः । इदं रामायणमांग्लेयानां परिहासास्पदमेवेति मण्डमुक्तन्तेन कविना । अपि च परप्रतारणपूर्वकं ध-

नार्जनपरेण पूर्वकालीनेन केनचिदस्मादृशा विदुषा कृतमिदं रामायणमिति पुस्तककर्तुरभिप्रायः । विद्वानयं पुस्तककर्ता नयनपाटवविकल एंवेत्यस्माभिरुक्तोभिप्रायः ॥

३ कर्म—केनैवंविधोभिप्रायो भवतोक्तः ॥

सत्य—श्रीवाल्मीकिरामायणे श्रीभागवते महाभारते चान्येषु पुराणेष्वपि कविनानेनोक्तव्यतिरेकेणाघटिता बहवो विषया विद्यन्ते । आंग्लेयपरिहासास्पदाश्च । आंग्लेयभाषाविदुषानेन तेषां साकल्येनादृष्टत्वादेव ॥

४ कर्म—श्रीभागवते महाभारते वाल्मीकिरामायणे चार्यमतप्रमाणेष्वघटिता विषया आंग्लेयपरिहासास्पदाश्च वर्तन्त इति भवताप्यंगीकृतं किम् । तथा चेत्तत्समाधानायार्या विद्वांसो न सन्ति किम्? ।

सत्य—विद्वद्भिरार्यैः क्रियमाणेषु समाधानेष्वप्यघटिताः परिहासास्पदाश्च जायेरन् । पुनरपि तत्समाधाने पुनस्तत्रापि जायेरन् । सखे कर्मनिष्ठ! आर्यमतप्रमाणानि श्रीभागवतमहाभारतवाल्मीकिरामायणादीनि सत्यान्येवेतीदमेव समाधानं समीचीनम् । प्रमाणानामतिगांभीर्यात्यर्थत्वात् ॥

५ कर्म—भवतोक्तमिदं कथं समाधानं भवेत्? । हन्तार्यमतप्रमाणानां भागवतभारतरामायणादीनां असाधुत्वे कथमार्यमतन्तिष्ठेत् । कष्टमिदानीम्महत्संकटमापन्नोहं कर्मपरः ॥

सत्य—सखे! मा विषीद। भागवतभारतरामायणादिप्रमाणेष्वद्वैतब्रह्मप्रतिपादकवेदान्तशास्त्रमनुसृत्यातिगम्भीरं आन्तरार्थो गर्भीकृतो विद्यते। तादृशान्तरार्थस्फोरकतयैव बाह्यार्थो वर्ण्यते। न तु बाह्यार्थस्य सत्यतया। एवंविधान्तरार्थगन्धानभिज्ञानामार्याणां प्रमाणमिदं भागवतभारतरामायणादिकं आंग्लेयपरिहासास्पदमेवेत्येतद्विज्ञानचिन्तामणिपत्रेषु जिज्ञासासत्कामित्याद्युपन्यासैरस्माभिरुद्घुष्टमप्यरण्यरुदितमेव वर्तते कालेयकालमहिमातिरेकेण ॥

६ कर्म—आर्यमतप्रमाणानां पुराणानामघटितत्वांग्लेयपरिहासास्पदत्वपरिहारायान्तरार्थो विद्यते चेदुक्तव्य एव तादृशोऽर्थो भवता लोकोपकृतये ॥

सत्य—वृत्तान्तपत्रेषूपन्यासैरार्यमतसञ्जीविन्यादिकतिपयपुस्तकरचनेन चास्माभिर्भागवतभारतयोरान्तरार्थो यथामति विवृतः। इदानीं यथामति वाल्मीकिरामायणान्तरार्थनिरूपणमावश्यकमेव। प्रस्तुतत्वात्तत्प्रसंगस्य ॥

७ कर्म—भागवतभारतादीनि पुराणानि व्यासोक्तानि। तदुक्ता तु नैमिशारण्यवासिन्यस्सूत एवेति खलु प्रसिद्धिः। रामायणन्तु वाल्मीकिप्रोक्तम्। आदिकाव्यं गेयमेव। गायकौ लवकुशौ महामण्डपे कुशलवावेवेति निश्चयः। एवंविधनिश्चयस्यान्तरार्थः कः ॥

सत्य—अद्वैतब्रह्मप्रतिपादकं वेदान्तशास्त्रं प्रस्थान-

त्रयाख्यब्रह्मसूत्रभगवद्गीतादशोपनिषत्सु समासेन प्रोक्तम् । तदेव ब्रह्मप्रतिपादकशास्त्रं पुराणेषु व्यासेन विस्तरेण प्रोच्यते । तस्मात् पुराणानि व्यासप्रोक्तानीत्युच्यते । अत्र व्यासशब्दो विस्तारवाचकः । नैमिशारण्यन्तु ब्रह्मणा विसृष्टस्य चक्रस्य नेमिर्यत्र शीर्यते कुण्ठीभवति तन्नैमिशं स्थानम् । तदेव भवादृशैः कर्मपरैर्नैमिशारण्यमित्युच्यते । अस्माकन्तु सत्यपराणां "चक्रे विसृष्टमजयेश्वर! षोडशारे निष्पीड्यमानमुपकर्ष विभो! प्रपन्न"मिति प्रह्लादोक्तस्य मनश्चक्रस्य ब्रह्मसृष्टस्य लयस्थानमेव नैमिशम् । तत्तु ब्रह्मनिष्ठैव । तस्मिन्नैमिशारण्ये ब्रह्मनिष्ठायां स्थितेभ्यस्सूतेन रसेन पुराणानि पठ्यन्ते । अत्र सूतशब्दो रसवाचकः । रसस्तु ब्रह्मरस एव । "रसो वैसः । रसं ह्येवायं लब्ध्वानन्दीभवती"तिश्रुतेः । "रसो ब्रह्म रसं लब्ध्वानन्दीभवति नान्यथे"ति स्मृतेश्च । (अन्यथास्य पुराणवक्तुस्सूतस्य रोमहर्षण इति नाम कथञ्जातं? वद सखे! ।)ब्रह्मरसानुभवस्य द्योतकं हि रोमहर्षणम् । अतस्सूतो ब्रह्मरस एव । तीर्थाटने नैमिशं गतो बलरामस्सूतं रोमहर्षणमवधीत् । तत्र स्थितैर्याचितस्तत्पुत्रमुग्रश्रवसं पुराणवक्तारं सूतमकरोदिति ब्राह्मण्यां क्षात्रियाज्जातस्सूत इति च वर्ण्यमानानां आन्तरार्थ्यस्समीचीनतयास्त्येव । अत्राप्रस्तुतविस्तराद्विरमामः । अयि सखे! व्यासप्रोक्तानां भागवतभारतादिपुराणानां श्रोतारो मनोलयात्मकब्रह्म-

निष्ठायां स्थिता एव । वक्ता तु रोमहर्षणोपलक्षितब्रह्मरसानु-
भवनेव । न तु वीणामङ्के निधाय कल्याणीशहनाबिहा-
र्कझंझोटीतिगायकः । व्यासप्रोक्तानां पुराणानामद्वैतब्रह्मर-
सप्रतिपादकत्वात्

८ कर्म—सखे! सत्यनिष्ठ! समासप्रोक्तानि दशोपान-
षद्भगवद्गीताब्रह्मसूत्राण्यपि व्यासप्रोक्तान्येवेत्यस्माकं निश्चयः

सत्य—समीचीन एवायं युष्मन्निश्चयः । यतो नि-
र्गुणन्निरवयवं शान्तं शिवमद्वैतं ब्रह्म तत्त्वमस्यादिमहावाक्ये-
षु भागलक्षणया समासेन प्रतिपाद्यते । तत्समासापेक्षया ब्र.
ह्मसूत्रादिषु व्यासेन विस्तरेण प्रोच्यते । अतो ब्रह्मसूत्रादी-
न्यपि व्यासप्रोक्तान्येव ॥

९ कर्म—तर्हि ब्रह्मसूत्रादीनि भागवतभारतादीनि पु-
राणानि च केन प्रोक्तानि? । वद सखे! ॥

सत्य—इदं चोद्यं सर्वकर्तुरसर्वशक्तस्य स्वतन्त्रस्ये-
श्वरस्याभाववादिनामेव युज्यते । न तु कर्मतत्फलेष्वासक्त-
स्य तव । अयि सखे! त्वाञ्च माञ्च त्वदभिमते धर्मपत्नीत्वेन
स्वीकृतां कुचकंचुकनासानौक्तिकालंकृतां स्त्रियञ्च त्वत्पितृ-
पितामहप्रपितामहादींश्चराचरात्मकमिदञ्जगच्च यः कृतवान्
स एवाकरोन्महावाक्यानि ब्रह्मसूत्रादीनि पुराणानि चेत्य-
स्माकन्निश्चयः । हा हा इदमनेन कृतमिदमनेनकृतमिति
प्रपञ्चान्तर्गतस्य सर्वस्य वस्तुजातस्य पृथक् पृथक् कर्तारमु-

क्त्वा लक्षोषापादने वयमशक्ताः । अलमप्रस्तुतप्रश्नोत्तराभ्याम् । प्रकृतमेवानुसरावः ॥

१० कर्म—रामायणं वाल्मीकिना कृतमिति तच्चाश्वमेधमहामण्डपे कुशलवाभ्यां गीतमिति च केनाभिप्रायेण वर्ण्यते ॥

सत्य—इदं रामायणं भागवतभारतादिभ्योत्यन्तं महदेव । वाल्मीकिरेवैतत्कर्ता । एतच्चाश्वमेधमहामण्डपे एव गेयम् । गायकौ तु कुशलवावेवेति श्रुतेर्निश्चयः ॥

११ कर्म—महाभारतादपि वाल्मीकिरामायणं महदेवेति यत् तन्न युज्यते । सपादलक्षग्रन्थात्मकं भारतम् । रामायणन्तु तत्तृतीयांशेपि किञ्चिन्यूनम् । भारते उपाख्यानानि बहूनि विद्यन्ते । रामायणे तूपाख्यानानि तन्यूनान्येव । अतो भारत एव महान् ॥

सत्य—सदा कर्मनिपुणेन होमधूमावृतदृष्टस्तवायमाक्षेपो युज्यत एव । सखे भारते मुख्यो बलवान् योद्धा वायुपुत्रो भीमः । रामायणे तादृशस्तु हनूमानेव । द्वयोः को वा बलवत्तरः? । भारते सोमवंशजानां राज्ञां कथा वर्ण्यते । रामायणे तु सूर्यवंशजानां राज्ञां कथा । सोमसूर्ययोः कोवातितेजस्वी । सम्यग्विचार्य वद ॥

१२ कर्म—"कालस्सूक्ष्मतरो लोके थ्सूलं गृण्हाति मानुषम्। शैल थ्सूलतरो राजन् कं गृण्हाति भयान्वितः

म्" । इत्यभियुक्तवचनात् सूक्ष्मविचारे रामायणमेव भारता-न्महत् । भीमादपि हनूमतो बलाधिक्यात् । सोमादपि सूर्य-स्यातितेजस्वित्वाच्च । एवंविधस्य रामायणस्य कर्त्ता वाल्मी-किरेवेति श्रुतिनिश्चयोस्ति वा । वाल्मीकिरयमादिकविः पर-मगुरुः को वेति न ज्ञायते ॥

सत्य—श्रुतिसिद्धस्य भगवतो वाल्मीकेस्तत्वतस्स्व-रूपज्ञानाय स्कान्दे वैशाखमाहात्म्ये शंखव्याधकथैवात्र वि-चार्या । तथा हि शंखनामानं कञ्चन महर्षिं वैशाखस्नानाय गोदावरीं प्रति गच्छन्तं कश्चिद्व्याधोतिक्रूरो मध्येमार्गं वटे बध्वा तदीयं कुण्डलादिकं धनं बलादहार्षीत् । तथाप्यक्रु-ध्यता शान्तेन पादुकाप्रतिप्रदानतुष्टेन तेन शंखेनोपादिश्य-माने वैशाखधर्मे व्याधमारकत्वेनागतयोर्गजसिंहयोरन्योन्य-युद्धेन नाशादुत्सृष्टचापाद्यायुधाय शुद्धचित्ताय व्याधाय द-यालुरयं शंखस्तत्र तटाकतीरस्थवटवृक्षच्छायायामुपविश्य भगवतो वासुदेवस्य वैशाखधर्मस्य च महिमानं सम्यगुपादि-शत् । तदानीन्तयोराश्रयो वटरसद्यः पपात पञ्चशाखी । व-टनिलयः कश्चिद्व्याळोपि दीर्घदेहः कराळो नष्टः । तदा शि-ष्यत्वेन स्वीकृताय व्याधाय राम रामेतिकूजस्वेत्युपादिशत्ता-रकब्रह्माख्यं राममन्त्रं परमगुरुश्शंखः । व्याधोपि तन्मन्त्रान-वरतजपध्वस्तपापपञ्जरः कळंकरहितो वल्मीकादवतीर्य वा-ल्मीकिरिति प्रसिद्धः कर्मबन्धनिकन्तनीं रामकथां लोके प्र-

ख्यापयामासेति सुस्पष्टमीर्यते वैशाखमाहात्म्ये । सखे! कर्मनिष्ठ! शृण्वस्य शंखोपाख्यानस्यान्तरार्थम् । "अस्ति सर्वान्तररसाक्षी शंकरः परमेश्वरः । साक्ष्यभावे जगत्साक्ष्यं कथं भाति सुरोत्तमाः" । इति ब्रह्मगीतासूपनिषत्सु प्रतिपादितस्सर्वस्य साक्षी देहेन्द्रियादिकल्पनाधिष्ठानरूपः कूटस्थ एवात्र शंखनामा मुनिरिति वर्णितः । शंखवत् कळंकरहितत्वात् । "कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः । प्राणानान्धारणाज्जीवस्संसारेण स युज्यते" । इति प्रतिपादितो जीव एव व्यधः । "जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः । तथा जीवेन कूटस्थस्सोन्योन्याध्यास इष्यते" । इत्युक्तकूटस्थतिरोधानमेव शंखस्य सर्वस्वमपहृतं व्याधेनेत्यवर्णयत् । "पुत्रकामो यजेत धनकामो भोगकामो यजेते"त्युक्तसकामधर्मास्सर्वे ऋग्यजुस्सामशाखासूक्तत्वात् शाखाधर्मा एव । "करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत" । इत्युक्तधर्मास्तु वैशाखधर्मा मोक्षधर्मा एवेत्यवगन्तव्यम् । एवञ्च मोक्षधर्मोपदेशेन जीवदुःखप्रदत्वेन प्रसिद्धयोर्मदक्रोधयोर्नाशमेव गजसिंहमरणत्वेनाकथयत् । तदा त्यक्तसकामधर्माय शुद्धाय जीवाय सर्वकल्पनाधिष्ठानत्वेन सर्वव्यापके विष्णुतत्वे सम्यगुपादिष्टे पाञ्चभौतिकदेहमिथ्यात्वं पञ्चशाखायुक्तवटवृक्षपतनत्वेनाकथयत् । तदा चाहं ब्राह्मणः क्षत्रियो वैश्यश्शैवो वैष्णवः कुलीनो विद्वानित्याद्यभिमाननाशमेव कराळदीर्घ-

देहव्याळनाशत्वेनाब्रवीत् । एवं ।नरामयानाय शुद्धाय जी-
वाय रामरामेतिजपात्मकं रामतापनीयोक्तं निर्गुणब्रह्मोपास-
नमुपादिदेश प्रत्यग्रूपो गुरुश्शंखः । तदुपासनेन .जीवभावज-
गद्भावबाधे स्वात्मैव शिष्यत इत्युक्तप्रकारेण कूटस्थमात्रा-
वशेषतया मुक्तोभवदिति वक्तव्यमर्थं वल्मीकादवतीर्य वा-
ल्मीकिरिति प्रसिद्धोभवदिति वर्णयामास स्कान्दे वैशाख-
माहात्म्ये । अयि कर्मनिष्ठ! "देहादभ्यन्तरः प्राणः प्राणाद-
भ्यन्तरं मनः । ततः कर्ता ततो भोक्ता गुहा सेयं परम्परा" ।
इतिगुरुपादैरुक्तां "परेण नाकं निहितं गुहाया"मिति श्रुत्या
चोक्तां पञ्चकोशगुहामेवात्र वल्मीकत्वेनाब्रवीत् । (अन्यथा
मृद्रूपाद्वल्मीकात् कश्चिद्दृषिर्जायेत किम्? । शंखव्याधकथा-
याः एवंविधान्तरार्थाभावे भावितां मुनिभिर्मुहुरिति तत्रैव
वैशाखमाहात्म्ये कथाविशेषणंमुक्तं कथं घटेत?। वदन्त्वार्याः)
एवंविधेत वाल्मीकिना प्रत्यगाभिन्नब्रह्मसाक्षात्कारवता जी-
वन्मुक्तेन परमगुरुणा संसारतापतप्तजीवोपकाराय कृतमद्वैत-
ब्रह्मप्रतिपादकमिदं रामायणं कर्मबन्धनिकृन्तनमेवेति श्रुत्य-
भिप्रायः ॥

१३ कर्म—कथमस्य रामायणस्यार्षकाव्यत्वम् ।
अश्वमेधमहामण्डपे कुशलवाभ्यामेव . गेयत्वञ्चागतम् ।
वद सखे? ॥

सत्य—जगदादेः प्रत्यगभिन्नस्य ब्रह्मणः प्रतिपाद-

कत्वादादिकाव्यत्वम् । अथवा "जगृहे पौरुषं रूपं भगवान्महदादिभिः । संभूतं षोडशकलमादौ लोकसिसृक्षये"ति आदावेव सृष्टस्य समष्टिशरीरात्मकस्य ब्रह्माण्डस्यायोध्यापुरलेन वर्णनादादिकाव्यत्वम् । (अन्यथा भवन्मते दिव्यवर्षाणां द्वादशसहस्रात्मकचतुर्युगादित्वं उतैकसप्ततिचतुर्युगात्मकमन्वन्तरादित्वं किं वा चतुर्युगसहस्रात्मकदैनन्दिनकल्पादित्वं आहोस्वित् द्विपरार्द्धात्मकब्रह्मकल्पादित्वमुच्यते । अथवा छन्दोमयपादबद्धपद्यरूपपुराणेतिहासकाव्यानामादित्वम् । तथैवेति चेत् शंखव्याधजननात् पूर्वं छन्दोमयपादबद्धश्लोकात्मकः कश्चिदपि ग्रन्थो नास्तीति प्रसज्यते । अपि च व्याधस्य रामनामजपात्मकभजनकालो रामावतारादर्वागेवेति सिद्धे वाल्मीकेर्जन्मापि रामावतारादनन्तरमेवेति वक्तव्यम् । तथैवेति चेत् "चर्षणी वरुणस्यासीद्यस्याज्ञातो भृगुः पुनः । वाल्मीकिश्च महायोगी वल्मीकादभवत् किले" ति श्रीभागवतवचनं कथं घटेत? । किमनेन प्रलपनेन "संभवामि युगे युगे" इतिवचनेन रामावतारा बहवस्सन्त्येव । तस्मान्न कोपि विरोध इति चेत् आर्याणामेवंविधं समाधानमेवान्ते शरणम् ।) सखे! अस्मदुक्तमादिकाव्यत्वमेव समीचीनम् । एवंविधमादिकाव्यं रामायणं अश्वमेधमण्डपे एव गेयम् । तथा हि । अश्वातोर्गत्यर्थत्वादश्वा गतयः । गतयस्तु भूरादिसत्यपर्यन्ताः पुण्यलोका एव । मेधशब्देन हिं-

सोच्यते । यज्ञशब्दस्य ब्रह्मविचारत्वं बहुधा प्रतिपादितं सूतसंहितायां यज्ञवैभवखण्डे । "सर्वं कर्माखिलं पार्थ! ज्ञाने परिसमाप्यत" इति गीतायामपि ज्ञानयज्ञ एव मुख्यो यज्ञ इति परमगुरुणा वासुदेवेनाप्युक्तमर्जुनाय । अतो ब्रह्मलोकपर्यन्ताः पुण्यगतयो मिथ्याभूता एव ब्रह्मणि कल्पितत्वादिति निश्चित्याद्वैतब्रह्मचिन्तनमेवाश्वमेधयज्ञः । (अन्यथा "तरति तरति ब्रह्महत्याम् । योश्वमेधेन यजते" । इति श्रुतिः कथं समीचीना भवेत्? । सयुक्तिकं सानुभवं वदन्त्वार्याः ।) "परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकम् । बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत्" । इति गुरुवचनेन "ज्ञानाग्निस्सर्वकर्माणि भस्मसात् कुरुते तथे"ति भगवद्वचनेन चाद्वैतब्रह्मविचार एव ब्रह्महत्यादिपापनिवर्तकोश्वमेधयज्ञः । तन्मण्डपे एवेदं गेयं रामायणम् । न तु सकामानां कर्मपराणां मण्डपे । तस्य कृमिकुण्डत्वात् । "तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः" इति भागवतवचनाच्च । सखे रामायणमिदमादिकाव्यं गेयमेव । न तु पाठ्यम् । "एतमानन्दमयमात्मानमुपसंक्रम्य । इमाल्लोकान् कामान्नीकामरूप्यनुसञ्चरन् । एतत्साम गायन्नास्ते" । इति श्रुत्यैव गेयत्वमुक्तम् । रामायणपठनमित्युक्तौ श्रुतिकोपो भवेत् । तस्माद्गेयमेव रामायणम् । गायकौ तु कुशलवावेव । तथा हि । "कुशपाणिर्विनीतव"दिति "तद्विज्ञानार्थं स गुरु

रुमेवाभिगच्छेत् । समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । आचार्यबान् पुरुषो वेदेति । शान्तो दान्तो विरक्त" इति च प्रमाणैस्सर्वं गृहादिकमुत्सृज्य ब्रह्मविचाराय गुरुमभिगच्छति यस्समित्कुशपाणिः । यश्च ब्रह्मलोकपर्यन्तभोगो लवप्राय एवेति निश्चित्य ब्रह्मानन्दभोगानुभवाय गुरुमभिगच्छति तावेव कुशलवौ विदेहकैवल्यलक्ष्म्यास्सीतायास्सुतौ साक्षादश्वमेधमहामण्डपालंकारस्याद्वैतपरब्रह्मणश्श्रीरामचन्द्रस्य वैदेहीप्राणवल्लभस्य बिंबादिवोद्गतौ बिंबौ रामायणगायकौ । (अन्यथा वीणावादनकुशलौ कल्याणीबिहागशहनाकापितोडिरागालापपटुमृदुकण्ठस्वरौ द्वौ गायकावेवेति चेत् सर्वसंगत्यागिनां सन्यस्तानां वनस्थानां नैष्ठिकानां मुनीनामेतयोर्गानेन परितोषः कथं भवेत्? । कश्चिद्ब्रसीमन्यः काषायवस्त्रं अपरो यज्ञोपवीतञ्जटाबन्धनमेकोपरस्साधुवादं पारितोषिकं ददुरिति वर्ण्यमानं कथं घटेत? ।) रामायणमिदं वाल्मीकिविरचितमादिकाव्यं अद्वैतब्रह्मप्रतिपादकमेवेत्यत्र न कोपि संशयः ॥

१४ कर्म—भवदुच्यमानमिदं सर्वमसंगतमेव । भवदभिमतमद्वैतं केन प्रमाणेन सिद्ध्यति । प्रत्यक्षादिप्रमाणाभावान्नास्त्येवाद्वैतम् । अपि च विदेहकैवल्यमिति कथं घटेत? । चराचरात्मकजगद्देहाविशिष्टस्य भगवतो नारायणस्य दिव्यमूर्तेस्सत्वात् । अद्वैतमिति भवदुक्तिः कर्णकठोरैव । अ-

द्वैतमेव सत्यमन्यत्सर्वं मिथ्यैव चेत् क्षीराब्धिर्मेरुरुर्वीति भगवदवतारा इति वाल्मीकिरिति रामायणमिति दशरथोयोध्या तद्वासिन इति कर्मनिष्ठस्तपोनिष्ठ इति च किमपि मा वद । यत्रकुत्राचत कोणे तूष्णीन्तिष्ठ । असंबद्धप्रलापिना त्वया सह सल्लाप एवानुचित इति भाति ॥

सत्य—सहर्षम् । अस्मिन् वाल्मीकिरामायणान्तरार्थविचारे पौलस्त्यो विश्रवसः पुत्रो दशाननो रावणो नाम निशाचरः क इति मम विचारोयमद्य सफलो जातस्त्वत्प्रसादात् । सखे विदेहकैवल्यलक्ष्मीमाधिक्षिपतस्तव वैदेहीप्राणवल्लभे श्रीरामे कथं भक्तिरस्यादिति विषीदामितमाम् । तवाक्षेपरूपचतुर्दशप्रश्नस्यास्य निरूपणमुपरि मूलबलयुद्धनिरूपणे भवत । यथाक्रमं रामायणान्तरार्थमेव पृच्छतु भवान् । सदा कर्मनिष्ठत्वेन होमधूमदूषितयोस्सूक्ष्मार्थग्रहणासमर्थयोस्त्वन्नेत्रयोर्दर्शनपाटवाय रामायणान्तरार्थस्यैव सिद्धाञ्जनत्वात् ॥

१५ कर्म—अयोध्येति दशरथ इति तत्पत्न्यः कौसल्यादयस्ततपुत्राश्चत्वारो रामादय इति पुरोहितो वसिष्ठ इति च वर्त्तमाननामान्तरार्थः कः ॥

सत्य—("देवानां पूरयोध्या । तस्यां हिरण्मयः कोशः" इति । "यो वै तां ब्रह्मणो वेद । अमृतेनावृतां पुरीम् ।" इति च श्रुतिप्रतिपादिता पुर्ययोध्या का? । गंगास्नानाय

काशीं गताः पुनस्स्वदेशमागताः केचिदार्या वयमप्योध्यामपि गत्वा दृष्टवन्तो रामराजधानीमिति वदन्ति सा चायोध्या पुरी का? । हे अप्येकैव पुरी उत परस्परभिन्ने । अत्रार्याणामभिप्रायः कः? । आर्यैरुच्यमाना काश्युत्तरदिशि स्थिता पुर्यैवायोध्येति चेत् तस्या अयोध्येति नाम कथं घटेत? । अस्माकं चक्रवर्तिना आंग्लेयेन युद्धे जितत्वादयोध्येति नाम न घटेतैव ।) हा हा "त्रयोदशाब्दसाहस्रं ब्रह्मचर्यमखण्डितम् । यत्र स्थितश्चकारासौ रामस्तस्य पुरीं शुभाम् । वक्तुं कश्शक्नुयाद्भूमौ प्राचेतसमृषिं विना । " सर्वे कर्मनिष्ठा मामुन्मादिनं ब्रूयुरेवान्तर्वाणयो भवादृशाः । मदीयोन्माददृशायां स्फुरितामयोध्यां वच्मि । "प्रकृतिमहदहंकाराश्च मात्राश्च भूतान्यपि हृदपि दशाक्षी"त्युक्तचतुर्विंशतितत्त्वैर्विरचितं ब्रह्माण्डात्मकं शुद्धसात्त्विकं समष्टिदेहमवायोध्या । मनवंशजानां मानवानां राज्ञां पुरी अयोध्याति प्रसिद्धेयमेव । अद्वैतब्रह्ममननमेव मनुः । मननं कुर्वाणा एव मानवाः । अद्वैतब्रह्ममननविकलानां मानवत्वन्न घटेतैव । "तरवः किन्न जीवन्ति भस्त्राः किन्न श्वसन्ति च । न खादन्ति न मेहन्ति किं ग्रामपशवोपरे । " इति श्रीशुकेन निषिद्धत्वात् । मानवानामेवेयं पुर्ययोध्या । पुरुषसूक्तप्रतिपादितेयं पुरी ब्रह्ममननाय नैव सृष्टेति न केनाप्यार्येण युद्धे वादेन जेया अतोयोध्येति नाम सार्द्धमेव । ब्रह्ममननजन्यब्रह्मानन्दानुभ-

वायैव ब्रह्माण्डस्य सृष्टत्वात्। "कष्टा ते सृष्टिचेष्टा बहुतर-भवखेदावहा देहभाजामित्येवं पूर्वमालोचितमजित! मया नैवमद्याभिजाने। नो चेज्जीवाः कथं वा मधुरतरमिदं त्वद्मुखाब्जद्वयार्द्रं नेत्रैश्चोत्रैश्च पीत्वा परमरससुधांभोधिपूरे रमेरन्।" इत्यनेन श्रीनारायणभट्टाख्यपरमभक्तवचनेनापि ब्रह्माण्डसृष्टेर्ब्रह्मानन्दानुभवसाधनत्वं स्पष्टमवगम्यते। तस्मादिदं समष्टिशरीरं ब्रह्मण्डमेवायोध्या पुरीति रामायणे वर्ण्यते। ब्रह्माण्डे सर्वेषां देवानामीश्वरावयवत्वेन स्थितत्वाद्देवानां पूरयोध्येति श्रुत्युक्तमपि साङ्गवत्। एवंविधायोध्यापुरे सर्गविसर्गस्थानपोषणोतिमन्वन्तरेशानुकथानिरोधमुक्त्याश्रयाणां अर्थचिन्तनात्मको दशविधो यो विचारः तादृशब्रह्मविचारवानेव दशरथः। अभीष्टदेशप्रापको हि रथः प्रसिद्धः। दशविधास्सर्गविसर्गादय एवाभीष्टाद्वैतब्रह्मप्रापकाः रथाः यस्य स दशरथः। ब्रह्मविचारवानेव दशरथ इति गर्भीकृतोथः। अत्र सर्गविसर्गादयो दशविधविचाराः श्रीभागवते द्वितीयद्वादशस्कन्धयोः प्रतिपादिता एव। एवंविधार्थज्ञानगन्धेनापि विकलानां पौराणिकानां दशदिक्षु यस्य रथो गच्छत् स दशरथ इत्येव गतेः। अत्र ब्रह्माण्डे सत्वगुणशक्तिरीश्वरोपाधिर्विद्यैव कौसल्येत्युच्यते। (अन्यथा कोसलपतेर्दशरथस्य कोसलपतेः पुत्री कौसल्या भार्येति कथं घटेत?। उत्तरकोसलपतिर्दशरथः दक्षिणकोसलराजपुत्री कौ-

सत्या तयोर्विवाहसम्बन्धो घटेतैवेति चेत् वेदान्तशास्त्रे द-
क्षिणोत्तरशब्दयोः प्रवृत्तिनिवृत्तिपरमर्थमजानतामेवैतत्समा-
धानं रमणीयम् । ननु परञ्जनपत्नी पुरञ्जनीतिवत् कोसल-
पतेः पत्नी कौसल्येति घटत एवेति चेत् कैकेयीसुमित्रयोर-
तिव्याप्तिर्दुर्वारा ।) विद्याशक्तेः कशलात्मकत्वाद्विद्यैव कौ-
सल्येत्यान्तरार्थसुगमः । "विक्षेपावृतिरूपाभ्यां द्विधावि-
द्या प्रकीर्तिता । " इत्युक्ताविद्याद्वैविध्ये विक्षेपशक्तिरेव सु-
मित्रेत्युच्यते । विक्षेपात्मकस्य वियदादिजगतः ब्रह्मविचार-
स्य मित्रवदुपकारकत्वात् सुमित्रेति नामास्यास्साङ्गवेव ।
आवरणशक्तिर्मायैव कैकेयीत्युच्यते । कैकेयीरूपेण मायैवा-
वतीर्णेति विदितमेव विश्वेषाम् । के जनाः कया मायया न
मुह्येरन् इति वाक्ये केकयेति पदद्वयाभिमान एव केकयः ।
स एवाश्वानां ब्रह्मलोकपर्यन्तगतीनां भोक्तृत्वेन पालकत्वा-
दश्वपतिः । तस्मान्मायैवाश्वपतेः पुत्री कैकेयीत्युच्यते । कि-
ञ्च तमोगुणोत्पन्नचराचरजगद्भ्रामकसंवत्सररूपकाल-
चक्रान्तर्गतदिनरात्रय एव दशरथस्य शतत्रयशतार्द्धा भा-
र्य्याः । अयि कर्मनिष्ठ? संवत्सरान्तर्गतदिनरात्रयस्सर्वा अ-
प्यद्वैतब्रह्मविचारायैवोपयोक्तव्याः । नत्वेव प्रपञ्चभोगाय ।
अतो दशरथस्य भार्याशतत्रयशतार्द्धा इत्यस्मिन्नादिकाव्ये
वर्णनं युक्तमेवं । (अन्यथा दशरथस्य भार्याणां शतत्रयश-
तार्द्धसंख्योपादाने प्रयोजनं वीणामंके निधाय गायद्भिः

पौराणिकैर्वक्तव्यमेव । दिनरात्रीणां पार्थक्यभिप्रायेण "म-
तृम्सप्तशतास्तारतु"इति क्वचिद्रामायणे दृश्यते । तदपि
साङ्खेव । ननु सौरचान्द्रादिभेदेन संवत्सरपञ्चकस्य "मा-
तुल,पाताल,वरांगि,विमला,तुलाः"इत्यक्तसंख्यामनुपादाय श-
तत्रयशतार्द्धसंख्याग्रहणादनुचित एवायमान्तरार्थ इति चेत्
आदिकवेर्वाल्मीकेर्जीवन्मुक्तस्यामानुषत्वात्तद्धृदयं को वा
वेद? । "न ते वागनृता काव्ये काचिदत्र भविष्यती"ति पि-
तामहानुग्रहात् सर्वमपि साङ्खेव । अपि च ब्रह्मविचारा-
त्मके अश्वमेधयज्ञे अद्वैतस्य ब्रह्मणस्समष्टिदेहरूपायोध्यायां
प्रतिबिम्बदर्शनकाम एव पुत्रकामेष्टिः । तस्यामिष्ट्यां परमार्थ-
तत्त्वमार्गणपरेषु शृंगवत्प्रसिद्धेन ऋश्यशृंगाख्येन शान्तानु-
गतेन गुरुणा क्रियमाणायां "अहमन्नमहमन्न"मितिश्रुत्युक्तं
यत् परमान्नं लब्धं तत्प्राशनेन सदद्वैतं यद्ब्रह्म तदेव स-
मष्टिविग्रहायोध्यायां विद्योपाधिकं सत् स्पष्टमेव प्रतिबिम्बि-
तम् । इममेव वक्तव्यमुपनिषदर्थं भगवानयोध्यायां दशर-
थपुत्रश्रीरामः कौसल्यायामवतीर्ण इति सुमंगळत्वेनावर्ण-
यत् परमगुरुरादिकविः । तदा च "आनन्दो ब्रह्मेति व्य-
जाना"दितिश्रुत्युक्तब्रह्मानन्दोपि कैकेय्यामावरणशक्तिरूपा-
यां मायायां परमभक्तो भरत इत्यवतीर्णः । अयि सखे शं-
खावतारो भरत इति भवादृशैरुच्यते खलु । "अपान्तरतन्द्र-
रवर"मितिश्रीभागवतवचनादप्तत्वमेव शंखः । अप्तत्वन्तु र-

सः । रसस्तु ब्रह्मानन्द एव । "रसो वै सः । रसं ह्येवायं लब्ध्वानन्दीभवती"तिश्रुतेः । अत आनन्द एव भरतः मायायामावरणशक्त्यामवतीर्णः । आवरणपूर्वकमेवानन्दप्राप्तिर्वक्तव्या । तुञ्चनाम्ना केरळीयेन केनचिदक्षराभ्यासगुरुणा परमार्थतत्त्वज्ञानवताप्युक्तं मायैवानन्दप्राप्तिहेतुभूतेति । किं बहुना श्रीरामे दण्डकान् प्रविष्टे अयं कैकयीतनयः नन्दिग्रामे स्थितस्सर्वानानन्दयन् समष्टिदेहायोध्यां बिभर्तीति भरतनामा जातः । तथैव वालिनं प्रतिश्रीरामेण वक्ष्यते च । सर्वानानन्दयता भरतेनाज्ञप्ता वयम् । त्वन्तु ब्रह्मानन्दं भरतमनादृत्य केवलमैहिकामुष्मिककामपरतन्त्रो वर्तसे । अतो मया वञ्चोसीति । सर्वथा आनन्द एव भरत इति गर्भीकृतोर्थः । अपि चाद्वैतब्रह्मतत्त्वं विचारयतः अहं ब्रह्मास्मीत्यपरोक्षानुभवेन भाव्यमेव । सोनुभव एव विक्षेपशक्त्यां सुमित्रायां जातो लक्ष्मणः । किञ्च चिद्रूपस्याद्वैतब्रह्मणश्चित्प्रकाशोपि समष्टिविग्रहे जायेत । स चित्प्रकाश एव सुमित्रायां शत्रुघ्नः पुत्रः । सखे कर्मनिष्ठ! संकर्षणावतारो लक्ष्मणस्सुदर्शनावतारश्शत्रुघ्न इति भवादृशैरुच्यते खलु । संकर्षणस्याहन्तत्वोपाधिकत्वात् अहं ब्रह्मास्मीत्यनुभव एव लक्ष्मणः । ब्रह्मलक्षणार्थ प्रतीच्यपि लक्ष्यमाणत्वात् लक्ष्मण इति नामास्य सार्थकमेव । तेजस्तत्त्वं सुदर्शनमिति भागवतवचनेन चित्प्रकाश एव शत्रुघ्नइत्यान्तरार्थः विशदायते।

चित्प्रकाशसुदर्शनस्य तमोरूपशत्रुहननसामर्थ्यात् शत्रुघ्न इति नामास्य युक्तमेव । (अन्यथा लक्ष्मणशत्रुघ्नयोर्नामाभिप्रायो वक्तव्य एवार्यैः ।) किञ्चाद्वैतब्रह्मज्ञानस्याहं ब्रह्मास्मीत्यनुभवज्ञानसाहचर्याद्रामलक्ष्मणयोरसाहचर्यं ब्रह्मानन्दस्य चित्प्रकाशसाहचर्यात् भरतशत्रुघ्नयोरसाहचर्यञ्चारिम्लादिकाव्ये वर्ण्यमानं साद्धेव । अन्यथा वीणावादनकुशलै. पौराणिकैः रामलक्ष्मणयोर्भरतशत्रुघ्नयोश्च साहचर्यकारणं वक्तव्यमेव बालभावेप्यभ्यस्तत्वकारणव्यतिरेकेण ।) भागलक्षणया महावाक्यार्थे विचार्यमाणे अखण्डाकारान्तःकरणवृत्तावुत्पन्नं ज्ञानमेव वसिष्ठो गुरुस्सूत्रात्मकप्राणादुत्पन्नः । विचारसहकारिण एव सुमन्त्रादयो मन्त्रिण इत्यवगन्तव्यम् ॥

१६ कर्म—विश्वामित्रवचनात्ताटकां पुनरिसद्धाश्रमे सुबाहूवादींश्च हत्वा मारीचं विद्राव्य यज्ञमरक्षदिति वर्णने कोभिप्रायः ॥

सत्य—अद्वैतब्रह्मज्ञानमेव मुख्यो यज्ञ इति बहुभिः प्रमाणैरुक्तं खलु । तादृशयज्ञस्य वैराग्यवानेव कर्ता । तस्मात्सत्यलोकपर्यन्तेषु विषयेषु वैराग्यमेवात्र रामायणे तपस्वी क्रोधनो विश्वामित्र इत्युच्यते । वैराग्यस्य शत्रुः प्रपञ्चविषयभोगाशैव । सैवात्र ताटकेत्युच्यते । प्रपञ्चविषयस्फुरणमेव मारीचः । मरिचवत्तापकत्वात् । प्रपञ्चविषयभोगाश

कर्म कुर्वाणो बाहेरव सुबाहुरशोभनो बाहुरित्याद्यभिमाना एव सुबाहुवादिनिशाचराः । अयि सखे! समष्टिविग्रहायोद्यायावतीर्णमद्वयं ब्रह्मैव श्रीरामः प्रपञ्चविषयभोगाशां विनाश्य तद्विषयस्फुरणं विद्राव्य सुबाहुवाद्यभिमानान् हत्वा ब्रह्मज्ञानयज्ञमरक्षदिति गर्भीकृतोर्थः । सिद्धाश्रममपि किञ्चिद्विवृणोमि । प्रत्यगभिन्नब्रह्मविचारायैव ब्रह्माण्डसृष्टिरिति प्रमाणैः प्रतिपादितं खलु पूर्वम् । एतदीषदप्यज्ञात्वा ब्रह्माण्डान्तर्गतजगद्भोगायैव यज्ञादिना भगवानाराध्य इति केषाञ्चिदभिमानो बलवानेव वर्तते । स एव महाबलिरित्युच्यते पुराणेषु । तन्निग्रहाय प्रथममाराधनीयप्रतिमारूपेण वामनो भूत्वा पुनर्ब्रह्माण्डन्तदन्तर्गतं सर्वमपि जगत्स्वशरीरे प्रदर्श्याभिमानमुपशाम्य भगवता त्रिविक्रमेण सर्वं खल्विदं ब्रह्मेति ज्ञानयज्ञानुष्ठानाय योग्यतामापादितमिदं जगदेव सिद्धाश्रममित्युच्यते । एतच्च भागवतान्तरार्थविचारे स्पष्टमेवोक्तमस्माभिः ॥

१७ कर्म—मिथिलोपवने विश्वामित्रेण सह गच्छन्दाशरथिरिन्द्रसंगमापराधेन गौतमशप्तां शिलारूपामहल्यां पादरजसोद्दधार शापादिति वर्ण्यमानस्यान्तरार्थः कः ॥

सत्य—शोशब्दः पशुवाचकः । पशुस्तु जीव एवेति प्रमाणसद्भावाद्ब्रह्मविचारार्हमानुषदेहमापन्नः उत्तमोजीव एवात्र गौतमशब्देनोच्यते । तेन क्रियमाणाद्वैतब्रह्मवि-

चारायं पोक्तव्या ब्रह्मविद्ध्रो भृगवल्लीत्याद्यपनिषदेवाह-
ल्येत्युच्यते । अयि सर्व कर्मनिष्ठ!. एकबीजावापेन शतगु-
णफलप्राप्तये हलेन कर्षणयोग्या कृषिभूमिर्हि हल्या । सा
कर्मकाण्डश्रुतिरेव । इयंतु निषेदुहिक मुष्मिकफलंप्राप्तये ह-
ल्या न भवति । अतो भृगवल्लाद्युपनिषदेवाहल्या । इय-
महल्या भवदृशैः कैश्चिदार्यैस्त्रैलोक्यभोगायोपयुज्यते । स
उपयोग एव त्रिलोकाधिपेन्द्रसंगमापराधः । अनेनापराधेन
शिलारूपा कार्यकरणाशक्ता भवेत्यहल्यां त्वमफलो भवेति
त्रिलोकाधिपतिमिन्द्रञ्चाशपदुत्तमर्जवो गोतमः । एवंविधा-
हल्याशापनिवर्तकं अद्वैतस्य परब्रह्मणश्रीरामस्य पादरज
एव । नान्यज्योतिष्टोमादिकं कर्म भवादृशैः क्रियमाणम् ।
कर्मणोपीन्द्रसंगमापराधित्वात् । अतः क्षाळय मि तव पाद-
पङ्कजेनाथ दाशरथेः किमन्तरम् । मानुषीकरणचूर्णमस्ति
चेत् पादयोरिति कया प्रतीयते । इति कविभिर्वर्ण्यमानं सा-
म्प्रतम् । (अहल्याशापविमोचनस्य एवंविधार्थकल्पनमयुक्त-
मिति चेत् तत्रोच्यते हल्यागौतमयोर्मिथिलो-
पवने वासः केनाभिप्रायेण वर्ण्यते । शापाद्भक्षतामापन्न-
स्यौदासो राजा मिथिलोपवने गच्छन् गोतमं दर्दर्शेति पु-
राणान्तरेष्वप्युक्तत्वेन गोतमस्य मिथिलोपवने वासो दृढी-
कृतः । अपि च हल्यापुत्रस्य शतानन्द इति नाम कथमा-
सीत् । किं पितामहनाम्ना उत मातामहनाम्ना । शतानन्द

स्य विदेहराजपौरोहित्ये कारणं किम् । पौराणिकैरार्यैर्वक्तव्यम् ।) अयि सखे शृंणु । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः । इत्यारभ्य स एको ब्रह्मण आनन्दः । इत्यन्तेन वाक्यकदम्बेन ब्रह्मविद्वरिष्ठस्योत्तरोत्तरशतगुणतया य आनन्दः प्रतिपाद्यते स एव हल्यागोतमयोः पुत्रश्शतानन्दः । देहमिथ्यात्वचिन्तनेनाद्वैतब्रह्मतत्वं विचारयतां विदेहानां शतानन्देनैव पौरोहित्यं कार्यम् । अद्वैतब्रह्मतत्वं विचारयता जीवोत्तमेन गोतमेन ब्रह्मविद्वरिष्ठेन सहायेन विदेहोपवने एव वस्तव्यम । न तु गेहोपवने । बाल्मीकिरामायणं गायतां पौराणिकानां एवंविधान्तरार्थविचारोस्ति वा । नास्त्येव । तेषां वीणातन्त्रीक्रूरकरणे स्वररामणीयकावादनाय तन्त्रीप्रोतकाचमणिचालने च सदा दत्तचित्तत्वात् ॥

१८ कर्न–मिथिलायां शिवचापखण्डनपूर्वकं सीताविवाहो वर्ण्यते । सखे सीताविवाहस्यान्तरार्थः कः ॥

सत्य–अयि सखे सीताविवाहं वक्तुमहं कियाननन्तर्वाणिः किञ्चिज्ञः । (मानवस्येक्ष्वाकोर्भूयतेविकुक्षिनिमिदण्डका इति त्रयः पुत्राः । तत्र विकुक्षेर्वंशे शताधिके पुरुषान्तरे अतीते अजस्य पुत्रो दशरथो जात इति स्पष्टमुक्तम् । तस्यैवेक्ष्वाकोः पुत्रस्य विकुक्षेरनुजस्य निमेर्वंशे विंशतिन्यूनपुरुषान्तरे अतीते सीरध्वजो नाम सीतापिता ज-

नकराजो जातः । एकवंशजयोर्दशरथजनकयोः कथं विवाहसम्बन्धो घटेत । किञ्च बहुकालव्यत्यासेन भिन्नभिन्नकालस्थयोस्तयोः कथं समकालस्थायित्वम । वदन्त्वार्याः ।)पुराणेषूच्यमानानन्देवर्षिब्रह्मर्षिराजर्षिप्रभृतीनाम्महतामस्मत्तुल्यत्वाभावाद्घटत एव विवाहसम्बन्धः । विदेहराजानां ब्रह्मनिष्ठेन दीर्घायुष्यात् युज्येतैव समकालस्थायित्वमिति महतामुत्तरं समीचीनमेव । रामायणस्याद्वैतप्रतिपादकवेदानानुरोधेनान्तरार्थं वदतामस्माकमनुकूलत्वात् । सखे प्रपञ्चोयं सत्य एवेति विश्वस्य तद्भोगाय कर्माणि कृत्वा होमधूमदूषितदृष्टेरपर्यघो भ्रमस्तव संसारचक्रभ्रमणोपशान्त्यै सीताविवाहश्रोतव्य एव । अतो मदीयकण्ठक्षोभं सुचिरमूरे वर्षितमकुर्वाणस्समाहितमनाश्शृणु । देहादिप्रपञ्चोयं मिथ्येति सम्यग्विचारवानेव विदेहः । प्रपञ्चमिथ्यात्वे निश्चिते का वा सतेति विचारमेव वैदेहो मिथिलाधिपो यज्ञार्थं भूकर्षणमकरोदिति वाल्मीकिर्गुरुरादिकाव्ये वर्णयामास । सिद्धान्तकौमुद्युत्तरार्द्धे पठ्यमाने भूसत्तायामित्यादावेवोच्चरन्ति खलु विद्यार्थिनः । अतो भूकर्षणन्नाम सत्ताविचार एवेत्यत्र विद्यार्थिनां पाठ एवास्माकं प्रमाणमशीलितपाणिनीयशास्त्राणाम् । सत्ताशोधने क्रियमाणे विदेहकैवल्यलक्ष्मीरस्मद्दूषिणी सर्वोत्तरसौन्दर्या सीतानाम्न्याविरभूत् । सैव वैदेहीत्युच्यते वेदविवर्तैरिमन्नादिकाव्ये । एतन्मुद्दोढुं यश्शक्त

चापखण्डनेन लब्धविजयस्य एव शक्तः नलन्यः । तथा हि । "शिवश्शक्तियुतश्शश्वत्त्रिलिंगो गुणसंवृतः । वैकारिकस्तैजसश्च तामसश्चेत्यहन्त्रिधा । ततो विकारसम्भूता षोडशानीषु कञ्चन । उपधावन् हि भूतीनां सर्वासामश्नुते गतिम् ।" इति श्रीभागवते दशमस्कन्धान्ते प्रतिपादितम । अतस्त्रिगुणात्मकानां षोडशविकाराणां प्रपञ्चविषयाणां श्रीरुद्रानुग्रहरूपत्वात् त्रैगुण्यविषयं सर्वं शैवधनमित्युच्यते । निस्त्रैगुण्येनैव विदेहकैवल्यलक्ष्मीस्सीता लभ्या । 'त्रैगुण्यविषया वेदा निस्त्रैगुण्योभवार्जुने"ति जीवं प्रतीश्वरवचनत । सखे कर्मनिष्ठेयं विदेहकैवल्यलक्ष्मीः प्रपञ्चान्तर्गतं त्रैगुण्यविषयं सर्वं वामहस्तकनिष्ठिकया प्रक्षिपदेव । अतस्मद्वीमिस्सहेयंसीता कुबेराक्षीक्रीडायां [ഒഴുക്കി ഒരു ഒ.ക്ഷിക്കുന്നതിൽ] शिवचापाधःप्रविष्टमेकमक्षमादातुं वामहस्तकनिष्ठिकया तद्धनुरचालयदिति तच्च जनको दृष्ट्वा शैवधनुष्यस्मिन् ज्यामारोपयति यस्तस्यैवेयं महिषीति निरचैषीदिति च पुराणान्तरेषु वर्णनेन त्रैगुण्यविषयसंगमेव धनुर्भंगमिषणावर्णयद्भगवानादिकविः । हा हा समष्टिविग्रहायोध्यायां कृतावतारं अद्वैतब्रह्मात्मकं महानुभावन्दाशरथिं विना को वा शक्नुयाच्छैवकोदण्डखण्डनपूर्वकं वैदेहीमुद्वोढुम । अतस्सीतारामयोः पाणिग्रहणमंगळं शोभनमेव विश्वेषाम । सखे कर्मनिष्ठा त्रैगुण्यविषयस्य खण्डनं वैराग्यपूर्वकमेव कर्तव्यम ।

अतो विश्वामित्रसन्निधौ तदनुमोदनेन धनुरखण्डयद्राम इ-
त्यवर्णयद्भगवानादिकविः ॥

१९ कर्त्र—श्रीरामस्सीतालक्ष्मणाभ्यां चतुर्दश वर्षाणि दण्डकेष्ववसदिति तद्विग्रहतो दशरथस्स्वर्गतोभूदिति भरतो नन्दिग्रामे वसन्नरक्षदयोध्यामिति च वर्णने का वान्तरार्थः? ॥

सत्य—प्रकृतिमहदहंकारादिचतुर्विंशतितत्त्वसमुदायात्मकं समष्टिशरीरं ब्रह्माण्डमेवायोध्येति तदन्तः प्रकाशमापन्नं सदद्वैतं ब्रह्मैव श्रीराम इति सर्गावसर्गाद्यधिष्ठानान्तदशविधविचारेण ब्रह्मननं कुर्वाण एव दशरथ इति च प्रतिपादितं खलु पूर्वम् । सर्वे षण्णवत्यंगुलायामं व्यष्टिशरीरमेव दण्डकमित्यत्र दिकाव्ये रामायणे वर्ण्यते । व्यष्टिशरीराणां बहुत्वात् क्वचिद्दण्डकान् दण्डकेष्विति बहुवचनं प्रयुक्तमस्मिन्नदिकाव्ये । (अन्यथा दण्डकं दण्डकान् दण्डकं दण्डकेष्विति बहुवचनैकवचनप्रयोगाभिप्रायं वदन्त्वार्याः पौराणिका वीणावादनकुशलाः ।) यदद्वैतं ब्रह्म समष्टिशरीरे श्रीराम इति प्रकाशमापन्नं तदेव व्यष्टिशरीरेष्वपि प्रविश्य चतुर्दशेन्द्रियवृत्तिरूपेण प्रकाशते । अत एव चतुर्दश वर्षाणि श्रीरामस्य वनवास इत्युक्तिरसाङ्ग्येव । अद्वैतस्य ब्रह्मणो देहादिभ्यो विवेचितत्वात् विदेहकैवल्यलक्ष्म्या सीतया अहं ब्रह्मास्मीत्यपरोक्षज्ञानसाहचर्यादहन्तत्वो-

पाधिकसंकर्षणरूपलक्ष्मणेन च सहैव दण्डकेषु वासरसाध-
रेव । व्यष्टिदेहप्रवेशे ब्रह्मतत्वविचारशैथिल्यमेव दशरथमर-
णत्वेनावर्णयत् । समष्टिदेहे ब्रह्मप्रकाशविरळत्वमेवायाध्या-
निलयानां दुःखप्रलापरूपेणोक्तं । ब्रह्म सातनकशंखावतारो
ब्रह्मानन्दो भरतश्चिद्रूपसुदर्शनावतारशत्रुघ्नेन सह स्वस्वरू-
पानन्दे नान्दिग्रामे वसन् समष्टिशरीरायाध्यामपालयत् ॥

१० कर्म—भगवतो दाशरथेर्वनवासो निशाचरान्
हत्वा दण्डकशून्यपादनेन देवानामृषीणामनुग्रहार्थ इति पू-
र्वन्दशरथेन कैकेय्यै दत्तस्य वरद्वयस्य सत्यापादनेन पि-
तृवाक्यपरिपालनार्थ इति च वर्ण्यते । एवंविधवर्णनस्य
न्तरार्थः कः ॥

सत्य—व्यष्टिशरीराण्येव दण्डकारण्यानीत्युक्तं खलु । व्यष्टिदेहेष्विन्द्रियाण्येव देवाः । ब्रह्मविचाराय प्रयुक्तानि बहुविधोपासनान्येव महर्षयः । एतेषां देवानामृषीणां च शत्रवो निशाचरा एवेत्यत्र न कोपि विशयलेशः । सखे देहादिप्रपञ्चे दृढसत्यबुद्धितया तद्भोगलम्पटं मत्सदृशः को वा कर्माणि करोतीत्यभिमाननण्डयारूढतया जलपात्रालंकृतहस्तं तालवृन्तव्यजनपट्टतरेतरहस्तं कुण्डलालंकृतकर्णयुगळं नाभेरुपरिविराजमानकटिसूत्रं रजततन्त्रीवदातधवळमुष्टिमेयोपवीतं पिच्चण्डिलतयानवरतविगळद्धौतवस्त्रपरिवेष्टितकटितट श्रीमन्तं श्रुतिं पठन्तं भवन्तं बोधयितुमशक्य-

भेव । तथापि किञ्चिद्ब्रवीनि । "या निशा सर्वभूतानां तस्याञ्जागर्ति संयमी । यस्याञ्जाग्रति भूतानि सा निशा पश्यतो मुनेः ।" इतिगीत द्वितीयत्र्यायान्ते भगवदुक्तस्यास्य श्लोकस्यार्थो भवता विचारितः किम् । अद्वैतब्रह्मतत्वं पश्यतो मुनेः या निशा सा प्रपञ्चनिष्ठैव । तस्य तस्यामीषदपिदर्शनाभावात् । तस्यान्निशायां प्रपञ्चनिष्ठायामेव ये चरन्ति ते एव निशाचराः ऋषिकण्टका देवशत्रवः एवंविधान्निशाचरान् हत्वा दण्डकान् शुद्धीकर्तुमेवास्मत्परदेवतायाश्श्रीराममूर्तेरयोध्यायामवतारो दण्डकेषु प्रविश्य वासश्च । (सर्वे निशाचरशब्दस्यैवंविधार्थाभावे कार्यगौरवाद्ग्रामौ ग्रामादुग्रामान्तरं गच्छत्सत्वसासु निशाचरत्वप्रसक्तिर्दुर्वारा । रात्रिसञ्चारादेव केवलाज्ञ निशाचरत्वं किन्तु "राक्षसीमासुरीञ्चैव प्रकृतिम्मोहिनीं श्रिताः ।" इत्युक्तक्रूरप्रकृतित्वादेव निशाचरत्वं वक्तव्यमिति चेदस्मदुक्तनिशाचरत्वमेव दार्ढ्यमावहम् । अत्रार्याणामभिप्रायो वक्तव्य एव ।) अत्र भगवतश्श्रीरामस्य दण्डकेषु व्यष्टिशरीरेषु प्रवेशे कैकेय्या वरद्वयमपि घटेतैव । तथा हि । पूर्वं दण्डकेषु वैजयन्तपुरे तिमिध्वजेन सह देवप्रार्थनया दशरथस्य युद्धे परिश्रान्तन्दशरथं अरक्षत् कैकयी । ततपरिचरणतुष्टेन दशरथेन तस्यै द्वौ वरौ दत्तौ । उचितसमये ग्रहिष्यामीति तया कैकेय्या तस्मिन्नवसरे तिमिध्वजेन सह युद्धे जटायुर्नाम पक्षी दशरथ-

स्य साहाय्यमकरोत् । दशरथश्च जटायुना सह सख्यमक-
रोदिति परमाणान्तरे विदितं खलु विश्वेषाम् । अस्य चाय-
मान्तरार्थः । व्यष्टिदेहेषु कामा एवोत्कृष्टत्वेन विजयन्ते
इत्यभिमान एव दण्डकेषु वैजयन्तपुरम् । तस्मिन् तिमि-
ध्वजो मीनध्वजः स्वर्गकामः पशुकामो धनकाम इत्यादि-
कामः । ब्रह्मतत्वं विचारयता दशरथेनामावापि कामो जयः ।
महाशनो महापाप्मा दुष्पूर इति भगवद्वचनेन बलवत्त्व-
दस्य युद्धे दशरथपरिश्रमो युक्त एव । आवरणशक्तेर्माया-
याः विलासा एवैते कामा इति समाधानमेव कैकयीकृत-द-
शरथपरिचरणम् । अयि कर्मनिष्ठ! "त्रिवृद्वेदमुपर्णाख्यो य-
ज्ञं वहति पूरुष"मिति बृहद्रथन्तरं पक्ष इति च बहुभिः प्र-
माणैः वेद एव गरुड इति निश्चिते गरुड ग्रजोरुणः ततपुत्रौ
सम्पातिजटायू इमे पक्षिणश्च वेदा एवेति निश्चयमभीचीनः ।
ब्रह्मार्पणतया कर्माणि कर्तव्यानीति कर्माणि प्रतिपादयन् क-
र्मकाण्डात्मको वेद एवात्र रामायणे जटायुरित्युच्यते । कार-
जये सोपि दशरथस्य ब्रह्म विचारयतः वयस्य इति वर्णनं स-
भीचीनमेव । एवञ्च समष्टिदेहायोध्यायामवतीर्णमद्वयं ब्रह्मैव
श्रीरामः व्यष्टिदेहेषु दण्डकेषु [तटियच्छित] चतुर्दशेन्द्रिय-
वृत्तिरूपेण प्रविश्य वसतु । ब्रह्मानन्दस्तु भरतः समष्टिदेहं ब्र-
ह्माण्डमयोध्यां रक्षतु । इत्यावरणशक्तेर्मायायाः निश्चय एव
कैकयीवरद्वयमिति वर्ण्यते । मायाया निश्चयमन्यथयितन्न को-

पि शक्तः । अतो वरद्वयबद्धं दशरथ पितरं मोचयितुं श्री-
रामस्य वनवास इति वर्णनं समीचीनमेव । (सखे श्रीराम-
वनवासस्यैवंविधान्तरार्थाभावे बाह्यार्थस्यैव सत्यत्वे श्रीरा-
मवनवासप्रयाणकाले "पुत्रं प्रथमजं प्राप्य जननी नाभ्य-
नन्दते"त्युक्तिः कथं घटेत । पुत्राभावे मम सद्गतिर्नास्त्येवे-
ति तप्यमानैर्मवादृशैः कांश्चिदार्यैः पुत्रलाभाय श्रीरामकथा
गीयते श्रूयते च । तादृशं सद्गतिप्रदं सीमन्तजं पुत्रमना-
दृत्य तत्साधनमात्रे श्रीरामे कोयमाग्रहोयोध्यावासिनाम् ।
साधनापेक्षया साध्यस्य मुख्यत्वात् पुत्रं प्रथमजमिति श्लो-
कोयमनुचितः खलु । वदन्त्वार्याः) ॥

२१ कर्म—दण्डकारण्ययात्रायामादावेव गुहो नाम
कश्चिन्निषादाधिपतिरश्रीरामदर्शनायागतः । अयं श्रीरामस्या-
त्यन्तमिष्टो भरतापेक्षयाप्यतीव भक्तश्च । त्वदीये राज्ये त्व-
या अयमादिना स्थेयमिति रामोप्येनमुपादिशत् । एतदा-
श्रिता निषादा बहवस्सन्तीति वर्ण्यते । सखे कोयमान्तरा-
र्थो गुहः? ॥

सत्य—(वने वसतोस्य निषादस्य राजधान्यां वसत-
श्चक्रवर्तिसुतस्य श्रीरामस्य च वयस्यत्वं कथमागतम् । अ-
योध्यापतीनां वने पर्वतप्रान्तेषु कृषिभूमिरास्ति वा । तदधि-
कृतः कश्चित् कृषीवलः किमयं गुहः । अथवा मृगयाया-
न्निषादराजेनानेन सख्यं जातं किम् । अपि चास्य गृह इ

ति नाम्नः को वार्थः । "श्रियो निवासो यस्योरः" तेन रा-
मचन्द्रेणालिंगनयोग्यतास्य कथञ्चाता । एतत्सर्वं विचार्यते
वा पौराणिकैरार्यैः ।) हन्त हन्त हिन्दुस्थानिकापिबहा-
कशहंनाझंझे टीतिरागालाप एव दत्तचित्तनां पौराणिकाना-
मेतद्विचारावसरः कुतः? । सखे मदीयचित्तभ्रमे भातमेनं
गुहं वच्मि शृणु । चराचरात्मकजगद्भ्रमस्य ईश्वरभ्रमस्य च
यदधिष्ठानं चैतन्यं तदेव ब्रह्मेति देहेन्द्रियादिभ्रमस्य जीव-
भ्रमस्य च यदधिष्ठानं चैतन्यं तदेव कूटस्थस्साक्षी प्रत्यगा-
त्मा सर्वान्तरश्शंकर इति च उच्यते । भागलक्षणया महा-
वाक्यार्थविचारेण जीवेश्वरभ्रमनाशे तु प्रत्यगात्मनं ब्रह्मत्य-
द्वैतमेव सत्यमितीशकेनकठप्रश्नाद्युपनिषत्सु प्रतिपाद्यते । ए-
वञ्च जगदधिष्ठानस्याद्वैतस्य ब्रह्मणश्श्रीराममूर्तेस्समष्टिशरी-
रायोध्यायां कृतावतारस्य व्यष्टिशरीरेषु दण्डकेषु प्रवेशाद्य-
क्षणे पञ्चके शगुहान्तस्थस्य कूटस्थचैतन्यस्य दर्शनं प्रथमतो
गुहदर्शनव्याजेनोक्तमादिकाव्ये गम्भीराभिप्रायेण । (एवंविधा-
न्तरार्थो न युज्यतएवेति निस्संशयं वदद्भिरार्यैः पौराणिकै-
र्निषादाधिपतेर्गुह इति नाम्नोभिप्रायमुक्त्वा पश्चाद्वीणातन्त्री-
ऋजूकरणं स्वररामणीयकापादनाय तन्त्रीप्रोतकाचमणिचा-
लनञ्च कर्तव्यम । नो चेत्तेषां रामायणगायकानां तोन्तरन-
गायकत्वमेव विशदं भवेत् ।) सखे गुहाधीना निषादास्तु
कूटस्थचैतन्याध्यस्ताश्चिदाभासा जीवा एव । महाभारतान्त-

र्गतवनपर्वणि कैरातपर्वणः आन्तरार्थं विवृतस्य परमभक्तस्यास्य गुहस्य परमार्त्थस्वरूपमीषदप्यजानतामार्याणां शृंगपुच्छचतुष्पादहीनतैकैव न्यूनतेति वक्तुं बिभेमि.सखे! ॥

२२ कर्म—सीतालक्ष्मणाभ्यां दण्डकेषु प्रविश्य गच्छता दाशरथिना प्रथमतो विराधो हतः किल । कोयं विराधो निशाचरः ॥

सत्य—रामायणान्तरार्थमीषदप्यजानद्भिर्भवाद्दशैरार्यैराशास्यमानो विविधः काम एव विराधो निशाचरः। अत्र विराधपदधात्वर्थ एव साक्षी । व्यष्टिदेहेषु प्रविष्टो भगवान् श्रीरामः विदेहकैवल्यलक्ष्मीमपहरन्तं कामं प्रथमतोजैषीत् । "न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मैव भूय एवाभिवर्द्धते । " इति वचनाद्बाणैः खट्गाभ्यां मुष्टिभिरिशलाभिर्हन्यमानोप्ययं न सहसा ममार । अत एनमवटे चिक्षिपतुर्दाशरथी इतिवर्णनं साध्वेव ॥

२३ कर्म—दण्डकेषु जनस्थाननिवासिनी सा शूर्पणखा का? । या छिन्नकर्णनासा विक्षरन्ती शोणितं चतुर्दश राक्षसान् रामेणामारयत् । पुनः किञ्चित्संशुष्कशोणिता रक्षसाञ्चतुर्दशसहस्रैस्सह खरदूषणत्रिशिरसोपि समहिनोद्रामपावके शलभप्रायान् । जनस्थानयुद्धं विवृणु सखे ॥

सत्य—जनानां व्यष्टिदेहोपाधीनाञ्जीवानां पुनः पुनस्थूलदेहनाशे मरणे । तदुत्पत्तौ जनने च स्थानं मम ए-

व । "मनः कर्ममयं नृणामिन्द्रियैः पञ्चभिर्युतम् । लोका-
ल्लोकं प्रयात्यन्य आत्मा तदनुवर्तते । " इति वचनात् द-
ण्डकेषु व्यष्टिशरीरेषु मन एव जनस्थानमित्युच्यते । तत्र
स्रक्चन्दनवनितादिविषयबुद्धिरेव शूर्पणखेत्युच्यते । दुर्वार-
वेगामेनां विषयबुद्धिं विदेहकैवल्यलक्षणकबलनोद्युक्तां प्रति-
वारयितुं कुरूपयितुञ्च कश्चक्षनयादहं ब्रह्मास्मीत्यनुभवम-
कर्षणावतारलक्षणं विना । विषयबुद्ध्यनुगतानि ज्ञानेन्द्रिय-
पञ्चककर्मेन्द्रियपञ्चकान्तःकरणचतुष्टयात्मकचतुर्दशेन्द्रिया-
ण्येव चतुर्दश राक्षसाः । सहस्रश आवर्तितास्तेषां वृत्तिभे-
दा एव चतुर्दशसहस्रं निशाचराः । (अन्यथा चतुर्दश राक्ष-
साः पुनश्चतुर्दशसहस्रं राक्षसाः जनस्थाने रामेण हताइति
संख्योपादाने निमित्तं किं वदन्त्वार्याः ।) अयि कर्मनिष्ठ
धनवानहं बन्धुमान् सुरूपस्सर्वकर्मसु समर्थोहं सोमयाजी
पौराणिकोहं घनपाठ्यन्तर्वाणिरिति सदा मनसि वर्तमानोभि-
मान एव जनस्थाननिवासी खरो नाम निशाचरः । त्रिगु-
णात्मकं त्रैलोक्यमिदं सत्यमेवेत्यभिमानस्त्रिशिरा नाम रा-
क्षसः । स्वर्गादिसुखायैव यज्ञादिकर्माणि कर्तव्यानीति नि-
श्चित्य "सुखमस्यात्मनोरूपं सर्वेहोपरतिर्हि तत्"इत्यवधूत-
प्रतिपादित स्वस्वरूपाद्वैतसुखं दूषयन् योभिमानो बलवा-
न्मनसि वर्तते स एव दूषणो नाम रात्रिञ्चरः । एतान् स-
र्वानपि जनस्थाननिवासिनो निशाचरान् हत्वा जनस्थान-

मनःशुद्धीच्छर भगवानयोध्यापतेः पुत्रः परमात्मा श्रीरा
मः । सखे कर्मनिष्ठ! बहुजन्माभ्यस्तं स्थिरं मूढ्मनसि स्थि
तं खरं देहाभिमानं हातुं त्रिपुरान्तकस्य श्रीरुद्रस्य कृपेव
भाव्यम् । अतः खरवधे श्रीरामो रुद्रांश एवेति भवादृशैरु
च्यमानं साध्वेव ॥

२४ कर्म—"संसारचक्रकचैर्विदीर्णमुदीर्णनानाव्यतापतप्तम् । कथञ्चिदापन्नमिह प्रपञ्चे त्वमुद्धर श्रीनृहरे! नृलोकम् । " इति श्रीधरस्वामिवचनेन कथञ्चिन्मनुष्यजन्मापन्ना एव संसारन्तरन्तीति निश्चित्य ये रामायणं गायन्ति शृण्वन्ति श्रीरामं पतितपावनं भजन्ति च नरास्ते एव कृतार्थाः । केचिद्रामायणमिदं त्रैवर्गिकप्रधानं न तु मोक्षोपयोगि श्रीमद्भागवतमेव मोक्षार्थिभिरादरणीयमिति मन्वानाः कुलपरम्परागतं वाल्मीकिरामायणगानमनादृत्य श्रीभागवतपौराणिका वयमित्यात्मानं कृतार्थम्मन्यन्ते । हा हा "अष्टादशपुराणानि सेतिहासानि चानघाः । रामायणैकदेशस्य कलान्नार्हन्ति षोडशी"मिति वचनं साद्धेव । अये सखे सत्यनिष्ठ! मायया कनकमृगरूपमारीचसहायेन श्रीराममपोह्य रामपत्नीं वैदेहीमपहृत्य मध्येमार्गं रुन्धानं जटायुमपि हत्वा दशमुखेनाशोकवने स्थापिता सीतेति वर्ण्यमानस्य सीताहारस्यान्तरार्थः कः? ॥

सत्य—विषयस्फरणमेव मारीच इत्यक्तं खलु [illegible]

म्मया । इदं विषयस्फुरणं मायामयमपि कनकवत्सर्वैर्मृग्यते । अतो मारीचो मायया कनकमृगो भूत्वा सीतां विदेहकैवल्यलक्ष्मीमलोभयत् । अद्वैतः परमात्मा भगवान्दाशरथिः प्रणवमयकोदण्डपाणिर्विषयस्फुरणनाशायोद्युक्तः । तदानीं विदेहकैवल्यलक्ष्मीरक्षकत्वेन निरूपितो योहं ब्रह्मास्मीत्यपरोक्षानुभवरूपो लक्ष्मणस्तस्यापरोक्षानुभवस्याप्यपगमे विदेहकैवल्यश्रियमपाहरद्रावणो लोककण्टको दशास्यः। अयि सखे! रामायणान्तरार्थे कोयन्दशवदन इति मया चिन्त्यमाने तवाक्षेपरूपचतुर्दशप्रश्नेनैव स्फुरितं दशाननस्यान्तरार्थमिदानीं वच्मि । पौलस्त्य इति रावण इति विश्रवसः पुत्र इति दशवदन इति लंकाधिपतिरिति च पदानामर्थविवरणे कष्वाञ्चिदार्याणां प्रकोपो भवेदेव । तथापि "न ते वागनृता काव्ये काचिदत्र भविष्यती"ति पद्मजानुगृहीतानां पञ्चकोशगुहावल्मीकादवतीर्णानां प्रत्यग्रपत्वेन प्राचेतस इति प्रसिद्धानामाचार्यपादानामनुग्रहेण प्रकोपोपि प्रहर्षाय भवेदेवेत्यभीतोहं विवृणोमि रावणम् । वाल्मीकिरामायणस्यैवंविध आन्तरार्थो न भवेदेवेति निस्सन्देहन्निर्भयश्च यो रोरवीति स एष रावण इति हृद्गतोर्थः । सखे श्रीरामनामश्रवणे तप्येत वपुरापादमस्तकं रावणस्येति प्रसिद्धिरसाध्वी खलु । रामपदे धात्वर्थं आनन्द एवेत्यत्र दाक्षीसुतशासनमेव प्रमाणम् । "आनन्दो ब्रह्मेति व्यजानात् । एकमेवाद्वितीयं

ब्रह्म । नेह नानास्ति किञ्चन । मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति । " इत्यादिश्रुतिभिः—

"उद्भूतं भवतस्सतोपि भुवनं सन्नेव सर्पस्स्रजः
कुर्वन् कार्यमपीह कूटकनकं बेदोपि नैवंपरः ।
अद्वैतन्तव सत् परन्तु परमानन्दं पदन्तन्मुदा
वन्दे सुन्दरमिन्दिरानुत हरे मा मुञ्च मामानतम् ॥
धामत्रयपथातीतं धामत्रितयसाक्षिणं
तुरीयं शिवमद्वैतमात्मानं विद्धि राघवम् ।
आश्रयं सर्वजगतामनाश्रयमविक्रियं
रामं विद्धि परं ब्रह्म सच्चिदानन्दलक्षणम् ॥
भिद्यते हृदयग्रन्थिर्यस्मिन्दृष्टे परावरे
क्षीयन्ते चास्य कर्माणि रामस्तद्ब्रह्म शाश्वतम् ।
यन्न जिज्ञासते ज्ञात्वा यद्ज्ञात्वा न निवर्तते
तदेकमद्वयं ब्रह्म रामज्ञानीहि शाश्वतम् ॥
दाम्नीवाहिरिदं यस्मिन्नामरूपात्मकञ्जगत् ।
असत्सदिव भात्येनं रामन्तद्ब्रह्म संस्मर ॥ " इत्यादि-स्मृतिभिश्च प्रतिपादितं पुरुषसूक्तप्रतिपादितसमष्टिविग्रहायोद्ध्यायामवतीर्णस्य भगवतो दाशरथेस्स्वरूपं अद्वैतं ब्रह्मैव । तदेव सत्यम् । अन्यत्सर्वं वियदादिकञ्जगन्मिथ्यैवेति श्रुते यस्यापादमस्तकं तप्यते वपुः स एवं रावण इति वेदविवर्तेस्मिन्नादिकाव्ये रामायणे वर्ण्यते । रावणोयमेतन्निमित्तानि

रक्षांसि च पौलस्त्या एव तथाहि । स्वावयवेभ्यः प्रजापतीन्देवादींश्च सृष्ट्वा ब्रह्मा लोकपातिस्तेभ्यस्स्वावयवांशमदादिति श्रीभागवते प्रतिपादितम् । तत्र पुलस्त्यः कर्णयोर्जातः । तस्य हविर्भुजि पत्न्यां द्वौ पुत्रौ । अगस्त्यो विश्रवाश्चेति । इळिबिळा कैकसी चेति द्वे पत्न्यौ खलु विश्रवसः । रुद्रभक्तः कुबेर ऐळिबिळिः । रावणकुम्भकर्णविभीषणाः कैकसीसम्भवाः । अयि सखे अत्रेदं चिन्त्यं स्वप्नप्राये मायामयेस्मिन् जगति कर्णाभ्यां यद्यच्छ्रूयते तत्तत्सत्यमेवेत्यभिमानः पुलस्त्यः कर्णयोर्जातः । तत्तदनुभोक्तव्यमेवेति मतिर्हि हविर्भुक् तस्य पत्नी । चराचरात्मकजगतो भगवतो नारायणस्य देहत्वात् सत्यत्वाच्च जगद्भोगानुभव एव विशेषकीर्तिरित्यभिमान एव हविर्भुजि जातो विश्रवा नाम पुलस्त्यस्य पुत्रः । चराचरात्मकजगतो भगवद्देहत्वेन सत्यत्वेपि प्राकृतप्रक्षये श्रीरुद्रकोपेन दह्यमानत्वाद्ब्रह्मकल्पपर्यन्तं श्रीरुद्रकृपया कुं चराचरात्मकभूमिं बिभर्तीति कुबेरनामा विश्रवसः पुत्रः । स एव लीयमानायाः चराचरजगद्देहलङ्कायाः पतिः । चराचरजगद्देहान्तर्गतानां निधीनां धनानां पालकश्च । चराचरजगद्देहस्य प्रळयकाले लीयमानत्वेपि पुनः पुष्ट्यादायुत्पत्तिदर्शनात् कीकसवद्दृढत्वाच्च सत्यमेवेदमात्मन्यभिमान एवं कैकस्यां विश्रवसः पुत्रो रावणो नाम [illegible] चराचरजगद्देहस्य सत्यत्वमन्वानोयं पौलस्त्यो

विश्रवसः पुत्रः कुबेरं पराजित्य श्रीरुद्रानुग्रहलब्ध लकाख्य चराचरजगद्देहं तस्मादपहृत्य लंकाधिपतिस्सन् चराचरजगद्देहविशिष्टं सर्वव्यापं भगवतो नारायणस्य स्वरूपमेव सत्यम। तच्चाप्राकृतदिव्यवैष्णवलोके शंखचक्रगदापद्मालंकृतचतुर्बाहुमेतं वर्तो। निर्गुणं निरवयवं निरञ्जनमद्वैतं ब्रह्मेति किमपि नास्त्येव। तच्छून्यतत्वमेव। प्रमाणाभावादिति सर्वान् रावयन् रावणो नाम प्रसिद्धः। दाशरथिमद्वैतं रामं द्विषन् कैवल्यलक्ष्मीरस्माकमेवाधीना भवतु स त्वद्वैतो रामो हन्तव्य इति निश्चित्य त्रिदेहकैवल्यलक्ष्मीमपहृत्य ब्रह्मार्पणतया निष्कामकर्म्मप्रतिपादककर्म्मकाण्डवेदं दशरथसख्यजटायुं मध्येमार्गं रुन्धानं निष्कामतया कर्म्मकरणे किमिह प्राप्यंफलं भगवद्देहत्वेन जगतस्सत्यत्वात् सत्यकामेनैष्कर्म्माणि कार्याणीति प्रतिपादयत् श्रीरामबन्धुजटायुं विदार्य सत्तारूपिणीं त्रिदेहजां मुक्तिलक्ष्मीं चराचरजगद्देहलंकायां बलात् स्थापयामास। हविर्भूजि जातः पुलस्त्यपुत्रोगस्त्यस्तु सोन्यजन्मनि दहाग्निरिति प्रमाणेन चराचरजगद्देहे जाठराग्निरसन् चराचरजगद्देहलङ्कानाथस्य रावणस्य नाशाय प्रणवमयवैष्णवचापदानेन सर्वं खल्विदं ब्रह्मेति ब्रह्मास्त्रदानेन च साक्षादद्वैतस्य ब्रह्मणश्श्रीरामस्य साहाय्यकृदेवेति विशदमुक्तमारण्यकाण्डे परमगुरुणा वाल्मीकिना। (अत्र चराचरजगद्देह एव लंकेति यदुक्तं तदसमीची-

नमेवेति चेत् पूर्वं लङ्काधिपः कुबेरः पश्चात्तं पराजित्य रा-
वणस्तस्मादहार्षील्लङ्कां खलु । दिक्पालेषु उत्तरदिक्पालस्य
कुबेरस्य दक्षिणलवणोदधिमध्ये लंकेयं कथमासीत । लङ्का-
यास्तत्र निर्माणे कारणं किं वदन्त्वार्याः पौराणिकाः ।) म.
खे चराचरजगद्देह एव लंकेत्यान्तरार्थ्यमसमीचीनः । "शुक्ल-
कृष्णे गती ह्येते जगतश्शाश्वते मते । एकया यात्यनावृत्ति-
मन्ययावर्तते पुन"रितिवचनेन चराचरजगतो दक्षिणगत्य-
न्तर्भूतत्वात् ॥

२५ कर्म—सर्व सत्यनिष्ठ त्वमतिधीरसि । यतः
निर्भयं वदसि रामायणस्यान्तरार्थम् । लङ्कायां दशमुख इ-
ति नाम कथं जातम् । वेत्सि किं वद ॥

सत्य—चराचरजगत्सृष्टि तु श्रीमद्भगवते दशविध-
त्युक्ता । तथा हि । "पञ्चिमे प्राकृताः प्रोक्तास्सर्गास्ते विश्व-
सृक्कृताः । वैकृतास्त्रय एवैते कौमारस्तमयात्मकः । " इ-
ति सृष्टिकथनावसरे मैत्रेयेणोक्तम् । सर्व प्राकृतसृष्टिपञ्च-
विधा । वैकृतसृष्टिस्त्रिधा । प्राकृतवैकृतोभयात्मिका सृष्टिस्त्वे-
कविधैवेति प्रतिपादितदशविधसृष्टिरूपचराचरजगद्देह एव-
यं रावणोभिमुखो वर्तते । जगन्निषेधावधित्वेन सिद्धे परमा-
त्मन्यद्वैते ब्रह्मणि दाशरथौ न कदाचिदप्ययमभिमुखः ।
तस्माद्दशमुख इति नामास्य साध्वेव । (अन्यथा दशमुख-
त्वकारणं वक्तव्यमेव पौराणिकैरार्यैः ।)

२६ कर्म—सीतान्वेषणाय सुग्रीवेण सख्यमकरोदिति वालिनं हत्वा वानरराज्ये सुग्रीवं राजानमकरोदिति च वर्ण्यते । अत्र च श्रीरामं प्रति वालिकृताक्षेपाय श्रीरामोक्तमुत्तरं न सम्यगासीदिति केषाञ्चिदार्याणामभिप्रायो वर्तते । श्रीरामेण सम्यगुत्तरमुक्तं वा ब्रूहि सखे ॥

सत्य—श्रीमद्रामायणे वाल्मीकिहृदयमीषदप्यजानतामार्याणां काकस्य कति वा दन्ता इतिवदाक्षेपसमाधानैः किं प्रयोजनम् । सखे स्वाक्षेपाय श्रीरामकृतसमाधानेन सन्तप्तस्त्वत्प्रभावमविज्ञाय मूढेन मयाधिक्षिप्तोसि । त्वया सम्यगुत्तरमुक्तं मदाक्षेपं क्षमस्वेति वाल्यब्रवीत् खलु । श्रीरामोक्तमुत्तरमसम्यक् चेत् पुनर्वालिनोक्तमप्यसम्यगेव । तथैवेति चेत् असम्यक्त्वं वर्णयन्नादिकविरप्यसमीचीनस्तत्कृतमादिकाव्यं रामायणमप्यसम्यगेवेति प्रसज्येत । तिष्ठतु बाह्यार्थविचारः । चराचरजगद्देहवैशिष्ट्यवादिना लोककण्टकेन दशास्येन सत्तारूपिण्यां विदेहकैवल्यलक्ष्म्यां अपहृतायां तदन्वेषणाय सुग्रीवसख्येन वालिवधेन च भाव्यमेवेति श्रुत्यभिप्रायः । तथा हि । बह्व्यः क्रियाशक्तय एव वालिसुग्रीवादिवानरसंज्ञयात्र रामायणे वर्ण्यन्ते । त्रिविधकरणजन्यानि कर्माणि । मनोवाक्कायरूपत्रिविधकरणन्तु पञ्चकोशगुहान्तर्गतमेव । प्रवृत्तौ प्रपञ्चसुखे निवृत्तौ मोक्षसुखे च किं किं न धास्यतीयं पञ्चकोशगुहा । सर्वं धास्यत्ये

त्र । अतः पञ्चकोशगुहैवात्र रामायणे किष्किन्धा वानरन गरीत्युच्यते । सखे कर्मनिष्ठ त्रैलोक्यसखाय प्रवृत्तौ प्रयोजिता क्रियाशक्तिरेव त्रिलोकाधिपेन्द्रपत्नी वाली । मोक्षसखाय निवृत्तौ प्रयोजिता क्रियाशक्तिरेव मोक्षद्वारात्मकसूर्यपुत्रस्सुग्रीवः । वालिनस्सकामत्वाच्चराचरजगद्दहलङ्काधिपेन सकामेन दशमुखेन सख्यवर्णनं साधेव । अपि चेदानीमयोध्यापालकं ब्रह्मानन्दं भरतमनादृत्य त्वं केवलं कामप्रधानोसि । मयोदितेषु निष्कामधर्मेषु नैव वर्तसे । अतो मया वध्य एव । सत्तारूपिण्याः विदेहकैवल्यलक्ष्म्याः मार्गणाय निष्कामधर्मेण सुग्रीवेण सह सख्यं युक्तमेवेति श्रीरामवचनाभिप्रायं वालिनं प्रति श्रीरामसमाधाने गूढार्थञ्च को वा जानाति पौराणिकः कोकिलवत् गायन्नपि । किञ्च अहमपशान्तः । त्वन्तु किष्किन्धायां राजा भव । आवयोर्योगपद्येन सुखं न दैवकल्पितमिति सुग्रीवं प्रति वालिवचनस्याभिप्राय "कर्म प्रवृत्तञ्च निवृत्तमप्यृतं वेदे विविच्योभयलिंगमाश्रितम। विरोधि तद्योगपदेककर्तरी"ति दक्षं प्रति सतीदेवीवचनमेव स्पष्टीकरोति ॥

२७ कर्म—श्रीरामकथाश्रवणेन रावणापहृता सीता लङ्कायां स्थितेति वाचा केवलं वानरेभ्यस्साहाय्यकरणेन च पूर्वन्दग्धावपि सम्पातेः पक्षौ पुनरुत्पन्नाविति वर्ण्यते । सम्पातेः पक्षदाहोत्पत्योरान्तरार्थः कः ॥

सत्य—चित्तशुद्धये निष्कामकर्म्मप्रतिपादकः कर्म्मकाण्डो वेद एव जटायुरिति विशदमुक्तं खलु प्राङ्मया। तदग्रजस्तु संपातिस्तु प्रत्यगभिन्नब्रह्मप्रतिपादकः ज्ञानकाण्डो वेद एव आम्नायस्य क्रियार्थत्वात् ज्ञानकाण्डस्याप्याम्नायत्वाविशेषात् कर्म्मतत्फलनिषेधकत्वमेव युक्तमिति केषाञ्चिदार्याणामभिमान एव दग्धपक्षत्वं संपातेः। प्रत्यगभिन्ने ब्रह्मणि सम्यक् पतितुं शीलं यस्य स संपातिः। अयं संपातिर्ज्ञानकाण्डो वेदः कर्मकाण्डवेदं जटायुं रक्षितुमुद्युक्तश्चेत् गरुत् ब्रह्मणि पतनसामर्थ्यं दह्येतैव सूर्यतेजसा। अतो जटायुं रक्षितुमुद्युक्तसंपातिसूर्यकिरणदग्धपक्षे भूदिति वर्णनं समीचीनमेव। संपातेः पक्षाहरीतिं किञ्चिदूचिरे। ये कर्मनिष्ठा मा कुप्य। ये धूमापूपचणकचूर्णकृतगोळकादिभक्ष्यैराज्यलोळितैरानासनागञ्चमुदरपूरणाय कलाचतुष्टयलाभाय च कृतप्रयत्नैर्भवादृशैः कैश्चिदार्यैर्ब्रह्मविदासोति परमिति भृगुर्वै वरुणेरिति च सुस्वरमुच्चैरुत्तदूघुष्यते॥ अपि च मत्पुत्रः कदा बी—ए—बी—एलित्यादिं परीक्षायां विजयी भवेत् स्वामिन् नारायण कदाहं पौत्रमुखदर्शनेन कृतार्थस्यामित्याद्याशापाशशतावृतैः कटितटघटितपट्टवस्त्रोपरिविराजमानकनकसूत्रैर्विचित्रलतारेखान्वितराजतपात्रालंकृतहस्तैः कैश्चिदार्यैरुपनिषज्जापका एव दृश्यां पादप्रक्षालने स्वीकार्याः न कदाचिदुपीतरे इति सघृष्टमुच्चैरु

ते । सखे शृणु । दुःखे कस्मिंश्चिदायते चलादारब्धकर्मणः । सा द्वादशी भवेदेकादश्येव प्रभुवेश्मसु । किञ्चैजमानगृहे द्वादश्यामुपनिषदं पठसि चेत् कलाचतुष्टयदक्षिणा मृष्टान्नभुक्तिश्च लभ्येत । हन्त रे पुत्र उपनिषदं पठेति केचिदार्या गुरुतरकार्याण्यपि परित्यज्य स्वपुत्रमुपनिषदं पाठयन्ति च । अयमेव संपातेः पक्षदाहः । यदायं ज्ञानकाण्डो वेदसंपातिर्वैदेहीस्थितिकथनेन श्रीरामभक्तानामुपकारं करोति तदा दग्धयोरपि पक्षयोर्विरोहो भवेत् । (संपातेः पक्षिणस्तत्पक्षदाहविरोहयोश्चैवंविधार्थल्यनमयुक्तमेवेति चेत् सूर्यमिदग्धपक्षं विन्ध्ये गिरौ पतितं पुनष्षड्भ्यान्ते लब्धसंज्ञं कथञ्चिद्दःखेन स्वसमीपमागतमेनं संपातिं दृष्ट्वा निशाकरो नाम कश्चिन्महानुभावो महर्षिः रामदूतानामागमनपर्यन्तमेवन्तिष्ठ । आगतेभ्य स्तेभ्यो वानरेभ्यो वैदेहीस्थितिं कथय । तदा पक्षावुत्पत्स्येते । इत्यब्रवीत् खलु । तस्य महर्षेर्निशाकर इति नाम कथञ्जातम् । पितामहनाम्ना उत मातामहनाम्ना वदन्तु पौराणिकाः ।) सखे कर्मनिष्ठ शृणु । य एवं विद्वानुदगयने प्रमीयते इत्यारभ्य आदित्यस्य सायुज्यं गच्छतीति । अथ यो दक्षिणे प्रमीयते इत्यारभ्य चन्द्रमसस्सायुज्यं सलोकतामाप्नोतीति च मातेवं पदिशन्तीश्रुतिः ज्ञानकाण्डवेदस्य फलं सूर्यमण्डलद्वारा मोक्ष इति कर्मकाण्डवेदस्य फलं सोमलोकप्राप्तिस्तदनु पुनरावृत्तिश्चेति वदति ख

लु । तस्मात् परमात्मन्यद्वैते ब्रह्मणि पतनाशक्तस्य ज्ञान-
काण्डस्य वेदस्य उपदेशेनानुग्राहकस्सोम एव । स सोम ए-
व निशाकरो महर्षिरित्यस्मिन्नादिकाव्ये गंभीराभिप्राये रा-
मायणे वर्ण्यते । एतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो
विद्वानभिजयतीति श्रुत्यैव प्रसिद्धं संपातेस्तत्वतो रूपमजा-
नतां पौराणिकानां जनरञ्जनाय वीणातन्त्रीऋजूकरणमे-
व गतिः ॥

२८ कर्म—मारुतिश्शतयोजनमायतं लवणोदधिमु-
ल्लंघ्याशोकवनगतां सीतां दृष्ट्वा तयानुगृहीतोशोकवनं
भङ्क्त्वा लंकामदहदिति सुन्दरकाण्डे वर्ण्यते । अस्यान्तरा-
र्थः कः । आञ्जनेयं विवृणु सखे ॥

सत्य—दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फू-
र्तिः । दारितदशमुखकीर्तिः पुरतो मम भातु हनुमतो मूर्तिः।
श्रीमते हनुमतेनमः । सखे परमभागवतस्याञ्जनेयस्य महि-
मानं वक्तुं को वा शक्नुयात । अथापि किञ्चिद्विवृणोम्य-
स्य परमार्थं यथामति । "बुद्धीन्द्रियमनःप्राणाञ्जनानामसृ-
जत् प्रभुः । मात्रार्थञ्च भवार्थञ्च आत्मनेकल्पनाय च । "
इति श्रुतिगीताप्रारम्भे श्रीशुकवचनेन प्राणसृष्टिरकल्पनाय
कल्पनानिवृत्तये इति विशदमवगम्यते । प्रत्यगभिन्ने ब्रह्म-
ण्यद्वितीये यज्जीवेश्वरजगत्कल्पनं तन्निवृत्तये मुख्यप्राण-
स्य परमभागवतस्य श्रीरामदासस्याञ्जनेयस्यानग्रहं विना क-

श्शक्नुयात् सोमयाज्यपि चतुश्शास्त्रपण्डितोपि सम्यगधीत-
वेदोपीति किमु वक्तव्यम् । श्वसितुमपि न कोपि शक्तः ।
प्राणन्देवा अनुप्राणन्ति । मनुष्याः पशवश्च ये । इति श्रु-
तैयवास्य महिमोद्घुष्यते । "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्म-
णा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना । " इ
ति भगवता वासुदेवेनोक्ता ब्रह्मार्पणक्रियाशक्तिरेवाय हनू-
मानिति वाल्मीकिरामायणं वर्ण्यते । शतायुःपरिमितपार्थिव-
देहे अहम्ममेत्यभिमानावेश एव शतयोजनविस्तारो लवण-
दधिः । अस्य महतो हनूमतो वेगे किमाश्चर्य शतयोजन-
मात्रसागरो देहाभिमानः । चराचरजगद्देहविशिष्टमेव त-
त्त्वमित्यभिमानावेशवशंवदेन दशास्येन साक्षादद्वैतपरब्रह्म-
णो दाशरथेस्सत्तारूपिण्यां प्राणप्रियायां विदेहकैवल्यलक्ष्यां-
चराचरजगद्देहलङ्कापरिनीतायां परमभागवतो मारुतिरयं
तान्द्रष्टुकामश्शतायुःपरिमितदेहाभिमानजलधिमुल्लंघ्य ल-
ङ्काश्रियं पराजित्य चराचरजगत्सत्त्वेनैव तदेवाशोकवनमिति
दशास्यरक्षिताशोकवने निगूढां विदेहजां कैवल्यलक्ष्मीं द्र
ष्ट्वा तयानुगृहीतः पौलस्त्यरक्षितमशोकवनं तदानन्दस्था
न्नैत्यज्ञोन्मत्थ्य दशमुखप्रयुक्तसप्तप्रकृतिपञ्चविषयाक्षादी
न्निहत्याद्वैतब्रह्मवाचकस्य प्रणवस्यान्यथार्थकल्पनेनेन्द्रजि
त्प्रसिद्धं मेघनादमपरोक्षज्ञानरूपो रामानुजो जेष्यतीति नि
श्चित्य दशाननन्दृष्ट्वा तस्मै श्रीराममाहात्म्यमुक्त्वा स्वद्

ह्यवृत्तस्य तस्य चराचरजगद्दहलङ्कां दग्ध्वा प्रतिनिवृत्त-श्श्रीरामपादारविन्दमेव ह स्वशिरसायं स्मरणमात्रार्तिनाशन-स्सेवकानाम्। सखे कर्णनिष्ठ दशमखहृतायास्सर्वोत्तरसौन्द-र्यवत्यास्सत्तारूपिण्या विदेहकैवल्यलक्ष्म्यास्सन्दर्शनं प्रति-पादयतोस्य काण्डस्य बालायोद्येत्यादिक्रममपहाय सुन्दर-काण्ड इति नामधेयं वाल्मीकिगद्याया निर्गतैर्गुरुवादैरेव नि-श्चितम्। अतस्समीचीनमेव काण्डनाम। (सुन्दरकाण्डस्यैवं-विधार्थकल्पनायुक्तमेव एतत्काण्डाभिधानमित्रायं वद-न्त्वार्याः। अपि च सीतादर्शनायाशोकवनं गन्तुमिच्छतो मारुतेः "सिद्धिमग्निश्च वायुश्च पुरुहूतश्च वज्रभृक्। वरुणः पाशहस्तश्च सोमादित्यौ तथैव च। सिद्धिमे संविधास्यन्तु देवास्सर्षिगणास्त्विह। नमोस्तु वाचस्पतये सयुज्रे" इत्यादिप्रार्थनायाः बन्धनिवृत्तिद्वारा मोक्षप्रत्यये उपनिषद-र्थविचारप्रवृत्तानाम्महतामार्याणां "शन्नो मित्रश्शं वरुणः। शन्नो भवत्वर्यमा। शन्न इन्द्रो बृहस्पतिः। शन्नो विष्णुरु-रुक्रमः। नमो ब्रह्मणे। नमस्ते वायो।" इत्यादिप्रार्थना-याश्च को विशेषः। वदन्त्वार्याः पौराणिकाः वीणाहस्ताइश-हनारागालापसमर्थाः।) सखे! अइउण् ऋलृक् चैवमि-कोयणाचि इत्यपि। निधाय हृदि विश्वेशं पर्वतो वह्निमानि-ति। सोपाधिकोयं व्याप्यत्वासिद्ध इत्यपि चादरात्। ये प-ठन्ति सदा तेषु महत्सु न वृथा भवेत्। कण्ठक्षोभो मे-

दीयोयमिति दाशरथिं भजे । तत्पादपद्मम् । शिरसा वह-
न्मामवताद्धरिः ॥

२९ कर्म—किञ्चाद्यहस्य । सख सत्यनिष्ठ! "भ-
क्ष्याशयाहिमंजूषां दष्वाखस्तेन भक्षितः" इतिवत् रामायण-
न्तरार्थप्रतिपादने प्रवृत्तस्त्वं स्वानिष्टप्राप्त्या महत्संकटमा-
पन्नोसि । यतो हनूमत्कृतचराचरजगद्दहलङ्कादाहनान्तरा-
र्थे त्वदभिमतायोध्यपुरमपि दग्धमेव । चराचरजगदात्मक-
ब्रह्माण्डस्य समष्टिदेहस्यैवायोध्यापुरत्वेनोक्तत्वात् । त्वदु-
न्मादोयन्तिरस्करणीमपहायेदानीं रंगं गत एव ॥

सत्य—सखे मा हस मां शास्त्रहृदयमविज्ञाय । च-
राचरात्मकब्रह्माण्डस्य समष्टिविग्रहस्येश्वरनिर्मितस्यैकत्वेपि
अयोध्यापुरत्वेनोक्तो ब्रह्माण्डात्मकस्समष्टिविग्रहः लङ्कापुर-
त्वेनोक्तो ब्रह्माण्डात्मकस्समष्टिविग्रहश्च परस्परभिन्नावेव । प्र-
तियोगिबुद्धिभेदात् । "भार्या धनुश्च ननन्दा च याता माते-
त्यनेकधा । प्रतियोगिभिया योषित् भिद्यते न स्वरूपतः ।"
इति । ईशनिर्मितमण्यादौ वस्तुन्येकविधे सति । भोक्तृधीवृ-
त्तिनानात्वात् ततभेदो बहुधेष्यते ।" इति च गुरुवचनान-
भिज्ञस्त्वं परिहससि माम् । वाल्मीकिहृदयं शृणु । "जगृ-
हे पौरुषं रूपं भगवान्महदादिभिः । सम्भूतं षोडशकलमा-
दौ लोकसिसृक्षया"दिति श्रीमद्भागवतप्रतिपादितो यस्समष्टिदे-
हः पारुषस्सोद्वैतब्रह्मविचारायैव स्वीकृतः । अतो ब्रह्मवि-

चारायोपयुक्तस्समष्टिदेहोस्माभिरयोध्येत्युक्तः । पौरुषस्य स-
मष्टिदेहस्य गृहीतत्वोक्त्या उत्सृष्टत्वमपि भवेत् । अतो-
न्यावतारसाधारणतया श्रीरामचन्द्रस्यायोध्यावासिभिस्सहैव
स्वलोकगमनमुपवर्णितं वल्मीकादवतीर्णैः प्रत्यङ्निष्ठैर्गुरु-
भिः । अद्वैतब्रह्मण्यनभिमुखस्य दशमुखस्य मते तु परमत-
त्वस्य सदा चराचरजगद्देहवैशिष्ट्याभिमानात् लङ्कापुरवे-
नोक्तस्य चराचरजगद्रूपब्रह्माण्डस्य ब्रह्मार्पणमित्याद्युक्तक्रि-
याशक्तिस्वरूपेणाज्ञनेयेन दाह्यत्वमेवाभिमतं सर्वांसूपनिषत्-
स्वित्यलमप्रस्तुतप्रसंगेन प्रकृतमेवानुसरावः ॥

३० कर्म—शतयोजनविस्तारे समुद्रे सेतुं बध्वा ते-
न तीर्त्वा सागरं लङ्कायान्निशाचरानवधीदिति वर्णनस्या-
न्तरार्थः कः ॥

सत्य—पुराणेषु पृथिव्यप्तेजोवाय्वाकाशाहन्तत्वम-
हत्तत्वाख्यसप्तप्रकृतय एव जम्ब्वादिसप्तद्वीपत्वेन वर्ण्यन्ते ।
मलिनचित्तैर्दुस्तरास्तदभिमाना एव लवणेक्षुसुरासर्पिर्दधिक्षी-
रोदकार्णवत्वेन वर्ण्यन्ते । अष्टमं प्रकृतितत्वमेव लोकालो-
काचलं परतस्तमोरूपेण वर्ण्यते । (अन्यथा सप्तसमुद्रा-
णां लवणेक्षुसुरासर्पिर्दधिक्षीरशुद्धजलमयत्वं केनाभिप्रायेण
वर्ण्यते । वदन्त्वार्याः ।) भूमेर्लवणत्वं जलस्येक्षुरसत्वं अ-
ग्नेराज्यद्रव्यसुरात्वं शोषकस्य वायोरांज्यत्वं विक्षेपात्मका-
काशस्य दधित्वं जगत्कारणाहन्तत्वस्य क्षीरत्वं शुद्धसात्वि-

कस्य महत्तत्वस्य शुद्धजलत्वं तमोरूपप्रकृतेस्तमस्त्वञ्च य-
ज्यते । तस्मात् प्रकृतिसप्तकमेव सप्तद्वीपसप्तसमुद्रा इत्या-
न्तरार्थसमीचीनः । एवंविधान्तरार्थोस्माभिरश्रोपन्यासागवता-
न्तरार्थे क्षीराब्धिमथननिरूपणे स्पष्टमुक्त एव । अत्र तु पृ-
थिवीतत्वाभिमान एव लवणोदधिः । पार्थिवस्य शरीरस्य
शतायुःपरिमितत्वात् दक्षिणगत्यन्तर्भूतत्वाच्च शतयोजनमा-
यते दक्षिणे लवणोदधौ सेतुबन्धनवर्णनं साध्वेव । (अन्य-
था लक्षयोजनविस्तारेण लवणोदधिना जम्बूद्वीपोयं सर्वतः
परिवेष्टित इति पञ्चमस्कन्धोक्तं कथं घटेत । भूगोलमिदमा-
काशे तिष्ठतीति सूर्यसिद्धान्ते गोलाध्याये स्पष्टमेवोक्तम् ।
अतो न घटतैव । किञ्च लक्षयोजनविस्तारे लवणोदधौ श-
तयोजनमात्रे लङ्केति वर्णने सा लङ्का त्रिकूटपर्वताग्रे स्थि-
तेति वर्णने च को वाभिप्रायः । अपि च क्षीराम्भोधेर्मध्य-
भाजि त्रिकूटे गजेन्द्रो नक्राक्रान्त इति स्पष्टमुक्तमष्टमस्क-
न्धे । गजेन्द्र श्रयस्त्रिकूटः लङ्काश्रयस्त्रिकूटश्च परस्परभिन्ना-
वुतैक एव पर्वतः । पर्वतस्य त्रिकूट इति नाम्नोभिप्रायः कः ।
पौराणिकैरार्यैर्वक्तव्यम् ।) सखे कर्मनिष्ठ त्रिगुणात्मकश्च-
राचरजगद्देह एव लङ्केति तुष्टो भव । सेतुबन्धनन्तु "मयो-
दितेष्ववहितस्वधर्मेषु मदाश्रयः । वर्णाश्रमकुलाचारमका-
मा समाचरे"दितिभगवदुक्तवर्णाश्रमकुलाचारानिबन्धनमे-
तत्सेतुबन्धनम् । "एष सेतुर्विधरणमेषां लोकानामसम्भेदा-

येति श्रुतेः। वर्णाश्रमकुलाचारानुष्ठानस्य देहाभिमानानिमित्तानां ब्रह्महत्यादीनां सर्वेषां पापानामशेषतया निवर्तकत्वात् सेतुस्नानेन सर्वपापनिवृत्तिरुपपन्नैव। (अयि सखे सेतुबन्धनस्यैवंविधार्थो न यज्यत एवेति चेत् "अबध्वा सागरे सेतुं घोरे च वरुणालये। लङ्का न मर्दितुं शक्या सेन्द्रैरपि सरासुरैः।" इति समुद्रतरणमन्त्रणे सुग्रीवं प्रति विभीषणवाक्यमसमञ्जसमेव। तदानीञ्जलयानाय नावस्सन्त्येव। चित्रकूटगमने भरतस्य सेनायाश्च गंगातरणाय पञ्चशतानां नावां घण्टालंकृतराजनौकायाश्च गुहेनानीतत्वात्। हनूमन् उत्प्लुत्य वा मकट एकतिपातनायाब्धौ गत्वा भरत निवद्य शृंगिबेरपुरात् गुहेन नाव आनयेत् ताभिस्तरणे सुकरे सेतुं बध्वैव लंका मर्दितव्येति कोयमाग्रहो विभीषणस्य। वदन्तु पौराणिकाः।) सर्वे सेतुबन्धनमस्मदुक्तमेव। आर्यैरिदानीं रामेश्वरे यत् सेतुस्नानं क्रियते तदप्यान्तरार्थश्रद्धाजनकतयात्यन्तमावश्यकमेव। नो चेत् श्रद्धाशैथिल्येन निरीश्वरत्वापत्तेः। एवंविधं सेतुं बध्वा तीर्त्वा देहाभिमानं चराचरजगद्देहलङ्कास्थिता निशाचराः निष्कामकर्मशक्तिभिर्वानरैर्हन्तव्याः॥

३१ कर्म—लङ्कायां प्रासादाग्रस्थितस्य मकुटालंकृतस्य रावणस्य दर्शनेन कुपितो वानरराजस्सुग्रीवस्सुवेलाग्रादेकोत्पातेन दशास्योरसि पतित्वा तन्मकुटमपाहरदि-

ति विचित्रं वर्ण्यते । मकुटपातनस्यान्तरार्थः कः ॥

सत्य—लङ्काधिपोऽयन्दशमुखो लोकेऽस्मिन्गुणशाली भाग्यव निन्द्रादिदेवानपि शासितुं शक्तो महाभाग एवेत्यत्र न कोपि विशयलेशः । तथापि एकमेवाद्वितीयं ब्रह्मेत्यादि-श्रुतिप्रतिपादितस्य देवानां पूज्यत्वाति श्रुतिसिद्धे अद्वैतब्रह्मननायैव सृष्टे समष्टिदेहायेश्वरपुरे कृतावतारस्य दाशरथेर्व्याष्टिदेहदण्डकेष प्रविष्टस्य परमात्मनश्चरामस्य प्राणप्रियां सत्स्वरूपिणीं वैदेहीं मुक्तिलक्ष्मीं प्रलोभ्य बलाच्चराचरजगद्देहलङ्कापुरमानिन्ये इति यत स एवास्य बलवान् धर्म एकः । अयमधर्म एव नाशहेतुरभ्येति सुन्दरकाण्डे "बभूव बुद्धिरत हरीश्वरस्य यदीदृशी राघवधर्मपत्नी । इमा यथा राक्षसराजभार्यासुजातमस्येति हि मधुच्छटः । पुनश्च सोचिन्तयदार्तरूपो ध्रुवं विशिष्टा भुगतो हि सीता । अथायमस्यां कृतवान्महात्मा लंकेश्वरः कष्टमनार्यकर्म ।" इति । "अहो रूपमहो धैर्यमहो सत्वमहो द्युतिः । अहो राक्षसराजस्य सर्वलक्षणयुक्तता । यद्यधर्मो न बलवान् स्यादयं राक्षसेश्वरः । स्यादयं सरलोकस्य सशक्रस्यापि रक्षिता" इति च हनूमद्वचनैरेव विशद्यते । एतादृशाधर्माभिनिवेशेन वैदेहीदूषणप्रवृत्तस्य दशमुखस्य तत्वमस्यादिवाक्येषु लक्षणा भागलक्षणा । इति "संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र युज्यते । अखण्डैकरसत्वेन वाक्यार्थो विदु-

षां मतः । " इति च प्रमाणमपहाय चिदचिद्विशिष्टत्वेन महावाक्यार्थकल्पनं यत् तदेव मणिमयकिरीटत्वेनोक्तम् । "स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । " इति श्रुत्यर्थविचारवता श्रीरामत्रयस्येन निष्कामकर्मरूपत्वानरराजेन सुग्रीवेण तदेव मकुटमधःपातितं चटचटप्रहारझर्झरीकृतम् ॥

३२ कर्म—रावणस्यानुजः कुम्भकर्णनामा निशाचरः कः । अयं सदा शयालुरप्येकस्मिन् दिने प्रबुद्धो भवेत् । यस्मिन् दिने प्रबुद्धस्तस्मिन् दिने सर्वानपि तापयेदेव ॥

सत्य—रामायणान्तरार्थविचारे लङ्कापतेर्दशमुखस्यार्थविवरणेऽभीतानामस्माकं कुम्भकर्णस्यार्थविवरणे को वा मयावकाशः । अयं सर्वैरपि गुणशीलाचारादिभिरग्रजसमान एव । चराचरात्मकमिदञ्जगत्सर्वं सत्यमेवेति स्थूलप्रपञ्चसत्यत्वाभिनिवेशवशंवदत्वादतिस्थूलकाय इत्युच्यते । पञ्चविधभेदभिन्ना देवासुरमनुष्यपशुपक्षिमृगादयो जीवास्वपुण्यार्जितसत्कर्मपरिपाकैर्भगवल्लोके स्वस्वरूपेण सुखमनुभवन्तो वर्तेरन् । अयमेव मोक्षः । द्वैतप्रपञ्चस्य सत्यत्वाद्द्वैतमिति किमपि नास्त्येव । अद्वैतवादिनां पाषण्डित्वात्तैस्सह वासेऽपि न समुचित इत्यभिमान एव कुम्भकर्णइत्यस्मिन्नादिकाव्ये वर्ण्यते । सा निशा पश्यतो मुनेरिति भगवदुक्तनिशायां द्वैतनिष्ठायामेव सदा स्थितत्वात् सदा निद्रालु-

रयमिति वर्ण्यते । द्वैतप्रपञ्चकर्ता कश्चिदीश्वरोस्तीत्यपि सद्भावात् सदा निद्रालुरप्ययं षण्मासान्ते एकस्मिन् दिने प्रबुद्धो भवेदिति वर्ण्यते । प्रबुद्धोयं हि तापथेदखलज्ञानान् स्वबलाग्निना द्वादशसंवत्सरात्मककालहरणभीत इव । हन्त हन्त किं बहुनोक्तेन द्वैतप्रपञ्चसत्यत्वाभिमानात् "श्रोतव्यादीनि राजेन्द्र नृणां सन्ति सहस्रशः । अपश्यतामात्मतत्वं गृहेषु गृहमेधिना"मिति श्रीमद्भागवते द्वितीयस्कन्धे श्रीशुकवचनरीत्या श्रोतव्यत्वेन भीतस्तैस्तैर्द्वैतप्रपञ्चविषयैः पुनः पुनश्श्रुतैरप्यस्य कर्णौ कुम्भवद्दर्पूरवेव । अतोस्य कुम्भकर्ण इति सार्थकमेवाभिधानम् । भगवतो नारायणस्यादिपुरुषस्य तेजस्तत्वेन द्वादशारेण कालचक्रेण सदा सन्तप्यमानमिमं जनं स्वयमपि तापयन्तं स्वाग्रजस्य दशमुखस्य नियोगेन युद्धयन्तं निष्कामकर्मरूपवानरान् भक्षयन्तं श्रीमद्द्वैतश्रीरामसखेन वानरराजेन हतनासिकाकर्णत्वात शोणितं बहु विक्षरन्तं स्वसमीपमागच्छन्तमेनं कुम्भकर्णमारयद्द्वैतः परमात्मा महाप्रभुश्श्रीरामः ॥

३३ कर्म—लङ्कापतेर्दशमुखस्य पट्टमहिष्यां मयसुतायां मन्दोदर्यां मेघनादनामा पुत्रोतिशूर इति वर्ण्यते । अयमेवेन्द्रजिदिति प्रसिद्धो मायाविनां मुख्यः । जेतुमशक्यमप्येनं हनूमद्विभीषणसहायबलात् सौमित्रिरजयत् खलु । आन्तरार्थे कोयमिन्द्रजित्? ॥

सत्य—"आनन्दो ब्रह्मेति व्यजाना"दिति । "एतस्यैवानन्दस्यान्यानि । भूतानि मात्रामुपजीवन्ती"ति । "विज्ञानमानन्दं ब्रह्मे"ति च श्रुतिप्रमाणैस्सर्वानन्दकरे प्रत्यगभिन्ने ब्रह्मण्यद्वैते श्रीरामे सर्वदा विमुखस्य दशमुखस्य सुखं चराचरजगद्देहान्तरेव वर्तते । मास्त्वद्वैते सुखं किन्त "सुखमद्वैतमेव हि । " इति । सुखमस्यात्मनो रूपं सर्वेहोपरातिर्हि तत" इति च प्रमाणप्रतिपादितेऽद्वैतसुखे विचार्यमाणे कियन्मात्रमिदञ्चराचरजगद्देहोदरस्थं सुखं मन्दमेवेति वक्तव्यम् । तदपि मायामयत्वात्तुच्छमेव । एतदेवाभिप्रेत्य सुन्दरकाण्डे "यथा मत्तश्च मातङ्गश्शशश्च सहितौ वने । तथा द्विरदवद्रामस्त्वं नीच शशवत् स्मृतः । स त्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे" इति अद्वैतब्रह्मसत्तया सीतयाप्युक्तम् । एवंविधमद्वैतानन्दमीषदप्यजानतो दशमुखस्य चराचरजगद्देहोदरस्थसुखवृत्तिरेव मयसुता मन्दोदरी पट्टमहिषीति वल्मीकादवतीर्णैरादिकविभिर्वर्ण्यते । चराचरजगद्देहोदरस्थसुखमेव मण्डवत् पेयमित्याभिमानात् मण्डोदरीति वा पाठः । एतादृशचराचरजगद्देहविशिष्टतत्वसाक्षात्कारसुखं विना किमिदं सुखमद्वैते शून्यतुल्ये इति निश्चित्य केन प्रमाणेन सिद्ध्यति युष्मदभिमतमद्वैतमिति मेघवन्नदन् अभिमान एव मेघनादनामा दशास्यतनयः । अयि सखे इदृधातोः परमेश्वरवाचकत्वादद्वैतस्य परमात्मनो वाचकः प्र-

णव एवेन्द्रशब्देनोच्यते "स मेन्द्रो मेधया स्पृणोत्वि"ति श्रुतिवाक्यस्थेन्द्रशब्दस्य भाष्यकारैराचार्यैः प्रणव इत्यर्थोभिहितः । तथाविधन्निर्गुणब्रह्मवाचकं प्रणवमिन्द्रं देहविशिष्टतत्ववाचकप्रतिपादनयुद्धे जयतीन्द्रजिदेवायं मेघनादः । मायाविनो मयस्य दुहितरि मन्दोदर्यांजातमनन्दुष्टं हन्तुमहं ब्रह्मास्मीत्यपरोक्षानुभवात्मकसंकर्षणावतारो रामानुज एव शक्तः । इन्द्रजिद्धनने ब्रह्मार्पणं ब्रह्महविरित्यादिक्रियाशक्तिरूपेण रामानुजं वहता हनूमता इन्द्रजितपितृव्येन परमभागवतेन विभीषणेन च साहाय्ये वर्तितव्यमेवेति श्रुत्याभप्रायः ॥

३४ कर्म—अयमिन्द्रजित पूर्वन्नागास्त्रैर्ववन्ध रामलक्ष्मणौ । तन्नागास्त्रबन्धनं गरुडेन निवृत्तम । पुनरप्ययं सर्वानपि वानरान् दाशरथी च ब्रह्मास्त्रेण ववन्ध । तत्र बन्धनञ्च हनूमदानीतसञ्जीवनौषधेन निरस्तमितिवर्णने कावान्तरार्थः ॥

सत्य—अद्वैतमसिद्धमिति मेघवन्नदन्नयं मण्डोदरीपुत्रः जीवोपाधेरहङ्कारस्य प्रतिशरीरं भिन्नत्वात्तदुपाधिका जीवा अपि प्रतिशरीरं भिन्ना एव । एवञ्च कथमद्वैतसिद्धिरिति गर्ज्जन् प्रत्यक्ब्रह्मणी रामलक्ष्मणौ जीवोपाधिभिरहङ्कारैर्ब्बबन्ध । अत्र जीवोपाधयोहंकारा एव नागपाशत्वेन वर्ण्यन्ते । (अन्यथा साक्षात् भुजगशायिनो नारायणस्य ततुप-

यैकस्यादिशेषस्य च कथन्नागास्त्रबन्धनं घटेत। वदन्त्वार्याः) अतो नागास्त्रबन्धनं जीवोपाधिबन्धनमेव। जीवोपाधीनामहङ्काराणान्निवारणे वेद एव शक्तः। तस्य प्रत्यगभिन्नब्रह्मप्रतिपादकत्वात्। अयि सखे कर्मनिष्ठ वेद एव गरुड इति प्रमाणसिद्धत्वात् गरुडेन नागपाशनिवृत्तिरुपपन्नैव। (एवंविधान्तरार्थाभावे "महत्तत्वाद्विकुर्वाणादहन्तत्वमजायत। वैकारिकस्तैजसश्च तामसश्चेत्यहन्त्रिधा। सहस्रशिरसन्देवं यमनन्तं प्रचक्षते।" इत्यादिप्रमाणैरहन्तत्वस्यादिशेषस्यफणिरूपत्ववर्णने तस्य भगवच्छयनत्ववर्णने च को वाभिप्रायः वदन्त्वार्याः।) अतस्साक्षाज्जगत्कारणाहंकार एवादिशेषस्संकर्षणस्सहस्रफणामणिमण्डलमण्डितः। महत्तत्वोपाधिकस्य चित्ताधिष्ठातुर्वासुदेवस्य कारणत्वेनाहन्तत्वान्तर्भूतत्वात भुजगशायित्ववर्णनमपि युक्तमेव वासुकितक्षककार्कोटककाळियादयो नागास्त्वहंकारावान्तरभेदा एव। "देहेन वै भोगवता शयानो बहुचिन्तया। सर्गेनुपचिते क्रोधादुत्ससर्ज्ज हि तद्वपुः। येऽहीयन्तामुतः केशा अहयस्तेंग जज्ञिरे। सर्प्पाः प्रसर्प्पतः क्रूरा नागा भोगोरुकन्धराः।" इत्यादिप्रमाणैर्देहाहङ्कारा एव क्रोधात्मना परिणतास्सर्पा इत्यच्यन्ते। अतो नागास्त्रबन्धनं नामाहङ्कारबन्धनमेवेत्यत्र न कापि संशयकणिका। ब्रह्मास्त्रबन्धनन्तु शब्दब्रह्मणो वेदस्य चराचरजगद्देहान्तर्गतकर्मततत्फलप्रतिपादकत्वात् च-

राचरजगतो भगवद्देहत्वेन सत्यत्वाच्च कथं वेदस्य प्रत्यग भिन्नब्रह्मप्रतिपादकत्वमुच्यते । प्रत्यक्ब्रह्मणो रामलक्ष्मणौ निष्कामकर्मशक्तयो वानराश्च हता एवेति गर्ज्जन् अयमिन्द्रजित् ब्रह्मणो वेदेन ब्रह्मास्त्रेण बबन्ध सर्वान्मेघवन्नानद्यमानः । जडस्य सर्वस्य जगतश्चिद्रूपेण जीवनहेतुरद्वैतं ब्रह्मैव तत् ब्रह्मैव सञ्जीविनी । अतश्चिद्रूपिण्या सञ्जीविन्या ब्रह्मार्पणक्रियाशक्तिरूपाञ्जनेयानीतया ब्रह्मास्त्रबन्धनमपि निरस्तम् । एवञ्च नष्टसाधनकदम्बन्दशाननतनयन्दुष्टमिन्द्रजितं द्रष्टृदृश्यावेकीकृत्य प्रत्यग्रूपे स्वस्मिन् सम्यक् कर्षतीति संकर्षणाख्यो लक्ष्मणः पौलस्त्यस्य विभीषणस्य सहायेनावधीत् ॥

३५ कर्म—अयं विभीषणः कः? ज्येष्ठस्य पुत्रं कथममारयत् "बन्धुर्वधार्हदोषोपि न बन्धोर्वधमर्हति । त्याज्यस्वेनैव दोषेण हतः किं हन्यते पुनः । " इतिप्रमाणपर्यालोचने विभीषणकृत्यमनुचितमेव । इमं विभीषणन्दाशरथिराचन्द्रार्कमभ्यषिञ्चत् खलु लङ्कराज्ये । "चतुर्भिर्भन्त्रिभिस्सार्द्धमुत्पपात विहायस"मित्युक्तम् । तन्मन्त्रिणश्चत्वारः के । सखे सत्यनिष्ठ विभीषणस्य विवरणेनाप्यानन्दय माम् ।

सत्य—अनारतं क्रियमाणे कर्मणिहोमधूमावृतशरीरस्त्वं तत्त एवेतीदानीं विशदायते । यतो रामायणान्तरार्थश्रवणे श्रद्धालुरसि । मदुच्यमानोयमान्तरार्थो वीणावाद-

नकुशलानां शहनाविहाक्झंझेटी तिंगालापपूर्वकं कोकिल-
वद्रामायणं गायतां तन्त्रीप्रोतकाच्चमणिचालन एव दत्तचि-
त्तानां केषञ्चिद्दार्याणां न रंचतैव मनसे । तथापि तत्ता-
दृशैव विवृणोमि तिलिगं तन्त्रिप्रथ चतुरं चतुरोपि
वीणावादने । अयं विभीषणो रावणनजो राक्षसेपि श्रीरा-
मभक्त एतेति विदितेव विश्वेभ्य । सर्वे समाहितचित्त-
श्शृण्वन्तु । सुप्तिसमये साधकं विना स्वप्रकाशतयानुभूयमा-
नमद्वितत्रमानन्दं श्रुतियुक्त्यनुभवैरुपपाद्य "ब्रह्मानन्दे सु-
प्तिकाले सिद्धे सत्यन्यदा शृण्वन्" ति । अन्यदा जाग्रत्स्व-
प्नयोरपि ब्रह्मानन्दं प्रतिपादयन्ति शृण्वन्ति प्रतिज्ञापूर्वकं
चराचरजगद्देहेपि श्रीरामभजनरूपमद्वैतब्रह्मानन्दमाचार्यैः
प्रतिपादितं चराचरजगद्दहलङ्कास्थितोपि यः कृतपण्यपुञ्ज-
मदानभवति जीवन्मुक्तस्म एव रावणानजो लङ्कास्थितो
विभीषणो नाम निशाचर इत्यस्मिन्नादिकाव्ये गम्भीराभि-
प्राये वल्मीकिनिर्गतैरादिकविभिर्वर्ण्यते । प्रवृत्तनिवृत्तयोः प्र-
वृत्तस्य प्राथमिकत्वात् प्रवृत्तयोर्देहविशिष्टयोर्दशाननकुम्भ-
कर्णयोर्ज्येष्ठत्वं निरञ्जनं निरवयवं ब्रह्माद्वैतं श्रीरामं भजनो
विभीषणस्य तु निवृत्तत्वात् कानिष्ठ्यं युक्तमेव । वेदान्त-
शास्त्राभिप्रायात् । निर्गुणोपासकानां परमभागवतानां श्री-
रामभक्तानां चराचरजगद्देहलङ्कास्थितत्वेपि तद्धर्मायोगः त-
द्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापक-

र्म न श्लिष्यते इति श्रुत्यैवोक्तः । अतः प्रळयपर्यन्तं लङ्का-पतिर्भवेति श्रीरामेणाभिषिक्तोयं विभीषण इति वर्णनं साध्वेव । "नोद्विजेत जनाद्धीरो जनश्चोद्वेजयन्न तु ।" इतिमक्तलक्षणस्योक्तत्वादस्य विभीषण इति नाम सार्थकमेव । अय सर्व एवंविधानाञ्जीवन्मुक्तानां परमभागवतानां वृत्तिभेदेन ब्रह्मवित् ब्रह्मविद्वरः ब्रह्मविद्वर्यः ब्रह्मविद्वरिष्ठः इति चातुर्विध्यमुक्तमाचार्यैः । ते चत्वारो वृत्तिभेदा एव विभीषणस्य चत्वारो मन्त्रिणः । (अन्यथा चतुर्भिर्मान्त्रिभिरिति सचिवानां चतुस्संख्योपादानं कारणं किं वदन्त्वार्याः ।) अयं कर्मनिष्ठ अयं विभीषणः प्रळयपर्यन्तं लङ्काराज्ये श्रीरामेणाभिषिक्तः खलु । दक्षिणे लवणाब्धौ शतयोजनान्त परं महानौकया सञ्चरद्भिरिदानीन्तनैः किमिति न दृश्यते । कलियुगे तिरोहितत्वादिति चेत कलियुगे तिरोहितस्तिष्ठेत रामानुशासितः किलयम् । स्थूलदृष्टिभिर्न दृश्यते सूक्ष्मत्वादिति चेत् श्रीवाल्मीकिरामायणस्य सर्वविदितार्थव्यतिरेकेण सूक्ष्मार्थोस्तीति वक्तव्यमेव ॥

३६ कर्म—इन्द्रजिन्मरणेन सन्तप्तो रावणश्श्रीरामात् भीतश्शरणमलभमानस्स्वस्य मूलबलत्वेन स्थितान् सर्वानपि निशाचरानाहूय ह्यतैनं रामभिति कोपादाज्ञान्ददौ । तच्च मूलबलं सागरोपममपारमभिमुखमायान्तं दृष्ट्वा भीतान् सम्प्रविदीन्मा भैष्टेत्याश्वास्यालातचक्रप्रतिमं कण्डली-

भूतं कोदण्डमादाय स्वयमेक एव रणमध्ये तिष्ठन् मध्याह्नार्कवत् प्रतपन् यदा बाणमेकमुत्ससर्ज्ज तदा त्वं रामोहं रामस्सोयं रामस्तदिदं रामस्सर्वमपीदं राम इति परस्परप्रहारैर्नष्टे मूलबले विस्मितान् सुग्रीवादीन् विलोक्य "एतदस्त्रबलं लोके मम वा त्र्यम्बकस्य वे"त्युवाच भगवान् राम इति श्रोतृजनमनोरञ्जकं वर्ण्यते । को वान्तरार्थो मूलबलहनने ॥

सत्य—चराचरजगद्देहविशिष्टमेव तत्वं सर्वैरपि प्रमाणैरिसध्यति । न खेवाद्वैतन्तत्वं प्रमाणाभावादिति प्रलपन्दशमुखो लङ्केश्वरोयं सत्तारूपिणीं विदेहजां कैवल्यलक्ष्मीं देहविशिष्टत्वेन स्वायत्तीकर्तुमशक्नुवन् चराचरंजगद्देहलंकास्थितान् निशाचरान् सर्वदापि द्वैतस्थितं अतिस्थूलकायं कुम्भवद्दुष्पूरकर्णं परदेहन्तापयन्तं स्वानुजं कुम्भकर्णं अद्वैतमिति किमपि नास्त्येवेति मेघवन्नदन्तम्मन्दोदरीजातं स्वतनयमिन्द्रजितञ्च सर्वानन्दकरेणाद्वैतपरमात्मना दाशरथिना हतान् दृष्ट्वा क्रोधावेशवशंवदस्सन् किमिदमद्वैतमित्युच्यते चतुरशीतिलक्षभेदभिन्ना देवमनुष्यतिर्यगादयो जीवा न सन्ति किं ततक्रियमाणानि कर्माणि ततफलभूतास्स्वर्गादिलोकाश्च ततप्रतिपादकानि शास्त्राणि च क्षीराब्धिर्मेरुर्वीत्यादिकञ्च न सन्ति किं हा हा "अद्वैतवादिषु दुरुक्तिखलेषु मोहात् संघट्टितापि घटते न मदीयबुद्धिः

नागेन्द्रभोगपरिशोभितचक्रपाणेर्नित्यस्य नाशकथनात् सुग-
तायितेषु ।" इति गर्ज्जन् स्वकीयमूलबलत्वेन स्थितं पूर्वो-
क्तं सर्वमप्याहूय घनतैनमद्वैतं रामसत्यचोदयच्चतुर्दशप्रश्ने
यत्रकुत्रचित् कोणे तूष्णीन्तिष्ठति मां प्रति त्वमिव । तद्वा चा-
द्वैतः परमात्मा दाशरथिर्नाहाप्रभुर्द्धनर्हि तस्य प्रणवं पठन्ती-
ति प्रमाणप्रतिपादितं दहाग्निनागस्त्येन दत्तं कोदण्डं पाणा-
वादाय सर्वं खल्विदं ब्रह्म "नेह नानास्ति किञ्चन । मृत्यो-
स्स मृत्युमाप्नोति । य इह नानेव पश्यति ।" इत्यादिश्रुत्या
सत्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवद-
न्ति जीवम । ज्ञानक्रियार्थफलरूपतयेशशक्ति ब्रह्मैव भाति
सदसच्च तयोः परं यदित्यादिस्मृत्या च प्रतिपादितं रामबा-
णमेकं तूणीरादादाय यदोत्ससर्ज निशाचरेषु तदा हन्त ह-
न्त मूलबलस्यावस्थेदृशीति वक्तुं को वा शकनुयात् ।
आचार्याख्याधरस्थारणिसमनुमिळच्छिष्यरूपोत्तरारण्यावधो-
द्भासितेन स्फुटतरपरिबोधाग्निना दह्यमाने । कर्माळीवासना-
ततकृततनुभवनभ्रान्तिकान्तारपूरे दाह्याभावेन विद्याशिखि-
नि च विरते त्वन्मयी खल्ववस्था ।" इतिपरमभागवतै-
र्नारायणभट्टाख्यैर्विद्वन्मणिभिरुक्तन्यायेन त्वमहं रामस्सोयं
रामस्तादिदं राम इति सर्वमपीदं जगदद्वैते ब्रह्मणि जलाका-
राकारितलवणवल्लयमांप । सखे कर्मनिष्ठ तावाक्षेपरूपचतुर्द-
शप्रश्नस्थानेनैवोत्तरमुक्तमिति जानीहि । एतादृश मूलबल-

युद्धस्यान्तरार्थं अन्तर्वाणयोपि किमेति न जानन्तीति वि-
पीदामितमाम् । मूलबलनाशं दृष्ट्वा विस्मितान् सुग्रीवा-
दीन् प्रति एतदस्त्रचलं लोके मम वा त्र्यम्बकस्य वेत्यवा-
च्च भगवानद्वैतश्रीरामः । श्रीरामसदाशिवयोरभेदात् सम्य-
गेव दशरथिनोक्तम ॥

३७ कर्म—"गगनं गगनाकारं सागरस्सागरोपमः ।
रामरावणयोर्युद्धं रामरावणयोरिव ।" इतिवर्ण्यमानस्य रा-
मरावणयुद्धस्यान्तरार्थः कः ॥ वद सखे वेदान्तार्थानु-
सारेण ॥

सत्य—त्र्यम्बयुक्ते सर्वस्मिन्नपि मूलबले नष्टे सत्य-
स्याद्वैतस्य परमात्मनश्श्रीरामस्य विजयेन परितप्यमानोय-
ञ्चराचरजगद्देहलङ्कापतिर्दशमुखः चराचरजगद्देहविशिष्टं त-
त्वं उताद्वैतं तत्वं द्वयोरेकमेव भवतु द्वयोरवास्थितिः कथं
घटेत? तस्मादरावणमरामं वा जगद्भवतीति निश्चित्य यु-
योधाद्वैतपरमात्मना श्रीरामेण । अत्र हि रामरावणयोर्युद्ध-
वर्णनम् । अद्वैतः परात्मा श्रीरामो जयतीति ब्रह्मार्पणबु-
याशक्तिषु सुग्रीवादिवानरेषु देहविशिष्टोस्माकं स्वामी दश-
मुखो जयतीति निशाचरेषु च द्विधावस्थितेषु पश्यत्सु भ-
गवतो नारायणस्य देहमिदं चराचरजगत् सत्यमेवेति वी
रवादं वदतो लङ्कापतेः प्राकृतवैकृतोभयात्मकदृश्यविधसृ
ष्टिरूपमिदञ्जगन्मिथ्या प्रळये नाशदर्शनादिति वदन् चक

र्तास्य दशापि शिरांस्यद्वैतः परमात्मा दाशरथिः । दशविधसृष्टिरूपामिदञ्जगत् प्रळये नश्यदपि सृष्टिकाले पुनरप्युत्पत्तिदर्शनात् सत्यमेवेति लंकापतिर्वीरवादमकरोत्तैरेवांकुरैर्मुखैः । यदसद्भासमानन्तन्मिथ्या स्वप्नगजादिवदिति वदन् पुनरपि चकर्तास्य शिरांसि लङ्कापतेः परमात्मा श्रीरामः । जगतोसत्यत्वे श्रुत्यादिप्रमाणानामप्यसत्वात् केन प्रमाणेन सिद्ध्यत्यद्वैतं रे रे हतोसीति पुनरप्यंकुरद्भिश्शिरोभिर्भत्सयामास दशाननः । "किम्मानमिति चेन्नास्ति मानाकांक्षा स्वयम्प्रमे" इति वदन् पुनरपि चकर्तास्य शिरांसि रामः । स्वप्रमत्वेपि किं मानं वद रामेतितर्ज्जयतोस्यांकुरितानि दशापि शिरांसि । सखे कर्मनिष्ठ एवंविधं रामरावणयुद्धं महात्मनिर्बहुधा वर्णितम् । तथा हि । "अर्द्धोदीरितवीरवादमहरद्रामो यदस्त्रैः क्षणात्तेनैवांकरता मुखेन जगदे शेषञ्च लङ्केपतेः । साम्ये सत्यपिचातरौमिरुभयोर्द्धोनुष्कमायाविनोर्विच्छिन्नाननदर्शनैस्समभवद्व्रीळा रणे रावणे । " इतिवर्णयद्भिः कविभिः रामरावणयुद्धम्यान्तरार्थो ज्ञातः किमज्ञातो वेति को वेद हृदयं महात्मनाम् । सखे किं बहुना अद्वैतं शून्यतत्वमेवेति लोकान् रावयतोस्य रावणस्य लङ्कापतेरशिरःखण्डनेनावन्ध्यत्वमालोच्य "स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । " इत्यादिश्रुतिप्रमाणज्ञानता दहाग्निरूपेण वातापिमर्दनेन भगवता सर्वदा-

हकेनागस्त्येनोपदिष्टादित्यहृदयमन्त्रबलात्तस्य लङ्कांपतेर्हृद-
यं भित्त्वा जयमवाप भगवानद्वैतः परमात्मा वैदेहीपतिः ।
रावणहृदयविदारणविवरणं श्रीरामभक्तैरेव ज्ञेयम् । गुरुं प्र-
काशयेद्धीमान् न तु मन्त्रं प्रकाशयेत् इति प्रमाणं परम'
इंसकोट्यारूढनिजानन्दस्वामिगुरुशासनञ्चानुस्मृत्यात्र राव-
णहृदयविदारणविवरणाद्विरमामः' ॥

३८ कर्म—रावणवधानन्तरमग्निप्रवेशशुद्धया सीतया
समेतस्सानुजस्सर्वैर्भक्तजनैस्सहायोध्यां प्रविष्टोभिषिक्तस्सर्वा-
ञ्जानन्दयामासेति वर्ण्यमानस्य श्रीरामपट्टाभिषेकस्यान्तरा-
र्थः कः ॥

सत्य—अद्वैततत्वस्थापनायैव चतुर्विंशतितत्वरूप-
या स्वाभिन्नया शक्त्या चराचरजगद्रूपब्रह्माण्डायोध्यापुरी-
न्निर्माय तस्यां श्रीरामरूपेणावतीर्णस्साक्षादद्वैतः परमात्मा
श्रुतिस्मृतिपुराणेतिहासादिप्रमाणसिद्धाद्वैतपरिपन्थिनो नि-
शाचरान् हत्वा तादृशपरिपन्थिनिशाचरवशगतां सत्तारू-
पिणीं विदेहकैवल्यलक्ष्मीं प्रत्यगभिन्नब्रह्मज्ञानाग्निप्रवेशशु-
द्धां स्वीकृत्य तया विराजमानो महावाक्यार्थविचारजन्या-
खण्डाकारान्तःकरणवृत्तिज्ञानरूपवसिष्ठादिगुरुभिः पट्टाभि-
षिक्तस्सर्वोपनिषत्सिद्धान्तपारं गतैः परमाचार्यैस्संसेव्यमानपा-
दांबुजस्स्वस्वरूपाद्वैतानन्देन सर्वानानन्दयन् सीतापतिर्जं-
यति लोकमलघ्नकीर्तिः । इतिवल्मीकादवतीर्णैः प्रत्यङ्नि-

ष्टैः प्राचेतसैराचार्यैर्विरचितमिदमादिकाव्यं चरिभत्यन्तरार्थमद्वैतानुगतम् । (एवंविधान्तरार्थाभावे श्रीमद्भागवते एकादशस्कन्धे तुरीयाध्याये वसुदेवनारदसंवादे ऐक्ष्वाकं निमिनृपं प्रति नवयोगिष्वन्यतमेन जायन्तेयेन द्रमिळेन सीतापतिर्जयति लोकमलघ्नकीर्तिरिति वर्तमानकालेना लट्क्रिया प्रयुक्ता कथं घटेत । तदानीं श्रीरामस्य राज्यभरणकाल इति श्रीधरस्वामिनोक्तमिति चेत् निमिनृपश्रीरामयोर्बहुकालव्यत्यासात्तदपि कथं घटेत वदन्त्वार्याः ।) अयि सखे ब्रह्माण्डायोध्यायामवतीर्णस्याद्वैतस्य परमात्मनश्श्रीरामस्येदानीमपि राज्यभरणकाल एवेति तुष्टो भव । एवंविधार्थानुसन्धानमार्याणामननुमतञ्चेत् वाल्मीकिरामायणे भागवते भारते च बहुषु विषयेषु परस्परविरोधो दुष्परिहार्यः ॥

३९ कर्म—श्रीरामे राज्यं प्रशासत्ययोध्यायां कस्यचिद्विप्रस्य पुत्रे मृते किमिदमत्रमद्राज्ये विप्रपुत्रमरणमिति नगरपरीक्षार्थं सञ्चरन् श्रीरामः कञ्चिच्छूद्रं जम्बुकनामानं वृक्षे लम्बमानमधोमुखं धूमन्धयन्तं दृष्ट्वा तप्यन्तन्तं हत्वा ब्राह्मणपुत्रमजीवयदिति वर्ण्यमानस्यान्तरार्थः क.?।

सत्य—सखे ब्राह्मणपुत्रमरणे शूद्रस्य तप एव कारणम् । अत्र न संशयकणिकापि । यो वृक्षेधोमुखो धूमन्धयंस्तप्यति स एव शूद्रः । अत्रापि विशयलेशो नास्त्येव । तथा हि । आत्मप्रतिबिंब एव पुत्र इति विदितं खलु स-

वैषाम । समष्टिविग्रहायोध्यायां प्रतिबिंबरूपेणावतीर्णं सद-
द्वैतं ब्रह्मैव सर्वेषामात्मा बिंबभूतः । पुत्रस्तु ततप्रतिबिंबः ।
एवंविधस्य पितुः पुत्रस्य च ज्ञानं वेदज्ञानेनैव भाव्यम् ।
"पिता पुत्रेण पितृमान् योनियोनौ । नावेदविन्मनुते तं बृ-
हन्तम् । " इति श्रुतेः । एवंविधज्ञानवानेव ब्राह्मणः । स-
मष्टिदेहायोध्यायां प्रतिबिंबितमद्वैतं ब्रह्मैव श्रीराम इति ज्ञा-
नवैकल्यमेव ब्राह्मणपुत्रमरणत्वेनोक्तमत्रोत्तरे रामायणे ।
एतादृशज्ञानवैकल्यकारणं शूद्रस्य तप एव । वृश्च्यत इ-
ति वृक्षो देहः । ब्रह्मविचारार्हे मानुषे देहे वर्तमानोप्यूर्ध्वं ।
सर्वोत्तरे ब्रह्मणि आभिमुख्यं विहाय जगदिदं सत्यमेवेत्य-
धोमुखस्सन् ऐहिकामुष्मिकभोगलम्पटो यस्तप्यति स एवा-
धोमुखो धूमन्धयन् शूद्रः । शमदमादिब्राह्मणधर्माभावात् ।
धूमस्तु "धूमो रात्रिस्तथाकृष्णषण्मासा दक्षिणायन"मितिभ-
गवद्वचनेन "मा वः पदव्यः पितरस्मदास्थिता या यज्ञशा-
लासु च धूमवर्त्मभि"रिति दक्षं प्रति सतीदेवीवचनेन च
ज्ञातव्यः । सखे श्मशाने चैतन्यहीनकृमिपक्षकजम्बुकव-
न्मायामयातितुच्छविषयभोक्तृत्वेन जम्बुक इति शूद्रस्य ना-
म युक्तमेव । जडातितुच्छविषयाभिमुख्येन जळात्मकशम्बू-
कवत् जडप्रायत्वात् शम्बूक इति वा शूद्रस्य नाम । एव-
विधं शूद्रं हत्वा सर्वेषामयोध्यावासिनां जनानां स्वस्याद्वैत-
ब्रह्मप्रतिबिंबत्वज्ञानं प्रवर्तयामास भगवान्दाशरथिः । (एवं-

विधार्त्थाभावे शूद्राणां तपश्चरणार्हताप्रसक्तिर्दुर्वारा । शूद्राणान्तपश्चरणानर्हतेष्टापत्तिरेवेति चेत् "तं होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । " श्रुत्युक्ततपश्चरणप्राप्या ब्रह्मैवाहमित्यच्युततावासिशूद्राणां कथमुक्ता भगवता वासुदेवेनोद्धवाय । "स्त्रियो वैश्यास्तथा शूद्रास्सन्ति ह्यच्युततां गताः" इति श्रीकृष्णवचनमनुपपन्नं किल । वदन्त्वन्तर्वाणय आर्याः) अयि कर्मनिष्ठ न ते वागनृता काव्ये काचिदत्र भविष्यतीति ब्रह्मणानुगृहीतानां वल्मीकादवतीर्णानामाचार्याणां न कापि वागनृतप्रपञ्चविषया भवेत् । अतस्सर्वमपि वाक्यमद्वैतब्रह्मप्रकाशकमेवेत्यत्रादिकाव्ये रामायणे सर्वमकळङ्कम् ॥

४० कर्म—"यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत् । तामेव रात्रिं सीतापि प्रसूता दारकद्वयम् । " इति वर्ण्यमानस्य कोभिप्रायः । अपि च सर्वावतारासाधारणतया सर्वैरपि भक्तजनैरयोध्यावासिभिश्च सहैव श्रीराममूर्तेर्वैकुण्ठारोहणं केनाभिप्रायेण वर्ण्यते ॥

सत्य—सत्तारूपिणी विदेहकैवल्यश्रीर्यदा प्राचेतसपर्णकुटीमानन्दमयकोशगुहामद्वैतासिद्धये श्रीरामाज्ञया याता तदा अद्वैतपरब्रह्मणस्तेजस्तत्वसुदर्शनावतारश्शत्रुघ्नोपि लवण इति व्यपदिश्यमानं पृथिव्यादिकं जगदिदं मिथ्येति विनाश्य मधुरान्नामानन्दमयीं पुरीं निर्माय स्वयमपि प्राचेत-

सपर्णकुटीमानन्दमयकोशगुहां प्रविष्टस्सुषुप्तिसाक्षित्वेन स्थितः। तस्मिन् समये श्रीरामोप्यधोमुखस्य तपः कुर्वाणस्य शूद्रस्य शिरश्चिच्छेद। तदा प्राचेतसपर्णकुटीगुहायां स्थिता सीतापि पूर्वन्त्रयोदशविवरणे रामायणगायकत्वेनोक्तौ कुशलवौ पुत्रौ सुषुवे। सखे तपः कुर्वतोधोमुखस्य शूद्रस्य शिरश्छेदाभावे सीतापुत्रयोः कुशलवयोर्जनिः कथं भवेत्। सर्वोत्तरे ब्रह्मण्यद्वैते अनभिमुखः ऐहिकामुष्मिकभोगलम्पटतया प्रपञ्चाभिमुख एवाधोमुखश्शूद्रः खलु। तस्य शिरश्छेदानन्तरक्षणे ब्रह्मविचाराय कुशपाणिस्सन् गुरुसमीपं गच्छन् कुशः प्रपञ्चभोगोयं लव इति निश्चित्य ब्रह्माभ्यासाय गुरुसमीपं गच्छन् लवः तयोर्ज्जनिर्घटेत। तथैवोक्तं परमभागवतैर्महानुभावैः केरळीयैर्न्नारायणभट्टैः। "शत्रुघ्नेनार्दयित्वा लवणनिशिचरं प्रार्दयश्शूद्रपाशं तावद्वाल्मीकिगेहे कृतवसतिरुपासूत सीता सुतौ ते।" इति। (एवंविधान्तरार्थो नारायणभट्टैनैंव चिन्तित इति चेत अत्र पद्ये तावच्छब्दप्रयोगस्याभिप्रायं वदन्त्वार्याः।) एवं सत्तारूपिण्यां विदेहकैवल्यलक्ष्म्यामुत्पन्नौ वल्मीकादवतीर्णस्य परमगुरोश्शिष्यतां प्राप्तौ कुशलवौ परमानन्दाद्वैतप्रतिपादकरामायणगानेन परमहंसैर्मुनिभिरापि पूज्यमानौ समष्टिदेहायोध्यायां ब्रह्मविचाराख्याश्वमेधयज्ञमहामण्डपे अद्वैतपरमात्मनश्श्रीरामस्य सन्निधौ रामायणं सर्वानन्दकरमगायताम। तद्गाना-

न्ते विदेहकैवल्यश्रीरपि भुवि सत्तायामेवान्तर्हिता । तदा समष्टिदेहायोध्यायामवतीर्णोद्वैतः परमात्मा श्रीरामोपि निःशेषभक्तैरयोध्यावासिभिस्सहैव निर्गुणन्निरवयवं सच्चिदानन्दमद्वैतं स्वस्वरूपमेवाविशत् । स्वाभिन्नया शक्त्या स्वस्मिन् अध्यस्तं सर्वमपि जगत् स्वस्मिन्नेव प्रविलाप्याखण्डैकरसत्वेन प्रत्यगभिन्नब्रह्मात्मनावस्थानमेव श्रीरामस्य वैकुण्ठारोहणम् । अतोन्यावतारासाधारणतया सर्वैरयोध्यावासिभिस्सहैव श्रीरामस्य वैकुण्ठारोहणं वर्ण्यमानं साध्वेव । (अन्यथा सर्वावतारासाधारणतया श्रीरामवैकुण्ठारोहणस्याभिप्रायं वदन्तु पौराणिकाः ।) सखे कर्मनिष्ठ स्वस्य वैकुण्ठारोहणं प्रति प्राजापत्येन कालपुरुषेण सह श्रीरामे मन्त्रयति सति स्वाज्ञामतिक्रम्यान्तःप्रविष्टेन लक्ष्मणेनावेदितं दुर्वाससं क्षुधितं मृष्टान्नेनाशयित्वा लक्ष्मणत्यागपूर्वकं सर्वैर्भक्तैस्सह वैकुण्ठमगादित्युक्तं खलु । अत्र दुर्वाससो मृष्टान्नदानं सद्य एव वैकुण्ठारोहणमिति वर्णने को वाभिप्रायः । वैकुण्ठारोहणमन्त्रणकाले स मुनिरागतः । तस्मात्तं क्षुधितमन्नेन तर्पयित्वा वैकुण्ठमगाद्रामः । अयमेवाभिप्रायः न त्वन्योभिप्राय इत्येव वीणामंके निधाय गायतां पौराणिकानामन्ते गतिः । सखे दुर्वाससे मृष्टान्नदानन्नाम श्रीरुद्रकोपाय सर्वस्यापि जगतस्समर्पणमेव । सर्वथा रामायणमिदमादिकाव्यं अद्वैतस्थापकमेवेति सर्वमनवद्यम् ॥

४१—कर्ण—सखे सत्यनिष्ठ त्वयाऽयमानेयं वाल्मीकिरामायणस्यान्तरार्थः वाचा केवलं सिध्यति । नत्वेव प्रमाणैः । अपि चाद्वैतस्थापकतया रामायणेऽस्मिन् क्वापि किञ्चिदपि नोक्तम् । अतोयमसाधुरेवान्तरार्थः ॥

सत्य—"वाचन्देवा उपजीवन्ति विश्वे । वाचं गन्धर्वाः पशवो मनुष्यान्यर्पिता" । इति श्रुतेः सर्वमपि वाचैव सिध्यति । किञ्च प्रमाणानामपि वाग्रूपत्वात् वाचा केवलं सिद्धिस्साध्येव । अपि चात्राद्वैतस्थापकतया किञ्चिदपि नोक्तमिति यदुक्तन्तदसाधु । अत्रेदं चोद्योत्तरम् । चोद्यं "यश्च रामं न पश्येत्तु यञ्च रामो न पश्यति । निन्दितस्स भवेल्लोके स्वात्मानं विगर्हते" । अय श्लोकः कुत्र केनोक्तः । उत्तरम् । श्रीवाल्मीकिरामायणे अयोध्याकाण्डे श्रीरामस्य दण्डकारण्यप्रयाणे अयोध्यावासिभिरुक्तः । चोद्यम् । अस्यार्थः कः । उत्तरम् । यद्दृष्टिगोचरो रामो रामदृष्टिगोचरो यस्स एव कृतार्थः अन्यस्तु निन्दित आत्महन्ता चेत्यस्यार्थः । चोद्यम् । अत्रायमयोध्यावासिषु केवलं सम्बध्यते उतेदानीमस्मास्वपि । उत्तरम् । कालत्रयेपि सर्वेष्वपि जनेषु सम्बध्यते । चोद्यम् । श्रीरामस्यायोध्यावासिभिस्सहैव वैकुण्ठारूढत्वादिदानीं त्वं श्रीरामं पश्यसि किं न चेन्निन्दित आत्महन्ता च भव । उत्तरम् । शिलालोहादिकृतबिंबरूपेणेदानीमपि श्रीरामं पश्याम्येव । चोद्यम् । तर्ह्ययोध्यावासि-

नोपि श्रीरामे दण्डकान् गतेपि शिलालोहादिकृतबिंबरूपेण श्रीरामं पश्यन्तु तेषां प्रलापोनुचित एव अपि च बिंबरूपेण वा रामं यो न पश्यति दुर्मतिः । निन्दितस्स भवेदित्यपि तत्रायोध्याकाण्डे वक्तव्यमेवादिकविना । उत्तरम् । तर्हि यश्च रामभिति श्लोकोयन्तदानीमयोध्यावासिष्वेव सम्बध्यते । नत्वेवेदानीमस्मासु । चोद्यम् । हा हा । वृद्धिमिष्टवतोमूलमपि नष्टमितीरितम् । लौकिकं वचनं सार्थं सम्पन्नं त्वत्प्रसादतः । रामायणान्तरार्थनिषेधप्रवृत्तेन त्वया नास्मद्विषयो रामायणार्थ इति रामायणमेव निषिध्यते । उत्तरम् । किमनेन प्रलपनेन तव । श्रीरामं भजन्तः परमभागवतास्तमिदानीमपि पश्यन्त्येव । चोद्यम् । सखे मा कुप्य । सर्वैरयोध्यावासिभिस्सहैव श्रीरामस्यान्तर्हितत्वादिदानीन्तद्दर्शनं कथं घटेत । उत्तरम् । दशरथपुत्रस्य श्रीरामस्यान्तर्हितत्वेपि यो रामरूपेणावतीर्णस्स भगवान् भक्ताननुगृह्णन् दिव्यमंगळदेहविशिष्टो वर्तते । तमिदानीमपि तद्भक्ताः पश्यन्त्येव । चोद्यम् । सखे मयि कृपां कुरु । स भगवान् कः । उत्तरम् । "पाताळमेतस्य हि पादमूलं पठन्ति पार्ष्णिप्रपदे रसातलम्" । इत्यादिना श्रीमद्भागवतशास्त्रे सहस्रशीर्षा पुरुष इत्यादिना पुरुषसूक्ते च प्रतिपादित एव । चोद्यम् । "जगृहे पौरुषं रूपं भगवान्महदादिभिः । सम्भूतं षोडशकलमादौ लोकसिसृक्षयेति" श्रीमद्भागवतवचेनास्य भ-

गवद्रूपस्य महदादिभिः प्रकृतितत्त्वैर्विरचितत्वात् द्विपरार्द्धे ह्यतिक्रान्ते ब्रह्मणः प्रळये लीयमानत्वाच्च दिव्यमंगळदेह-विशिष्टस्स भगवान् कुत्र वर्तते । ब्रूह्यनुगृहाण । उत्तरम् । तदानीमप्राकृतदिव्यवैष्णवलोके चतुर्बाह्वाद्यलंकृतदेहविशिष्टो वर्तते । चोद्यम् । तदानीन्तस्य भगवतो देहः महदादिभिः प्रकृतितत्त्वैर्विरचितपौरुषदेहवत् प्राकृतः किमुताप्राकृतः । सक्रोधमुत्तरम् । भगवन्तमजानता मोमुह्यमानेन तपतपेत्युक्तेन पुनर्ब्रह्मणा तपस्तप्त्वा दिव्यवर्षसहस्रान्ते दृष्टं दिव्यमंगळं भगवतो देहं प्राकृतमिति ब्रूषे । श्रीमद्भागवतगन्धेनापि विकलस्त्वं सम्भाषणानर्हः । चोद्यम् । सखे मा क्रुधः । पाताळमेतस्य हि पादमूलमित्यादिना श्रीमद्भागवतशास्त्रे प्रतिपादितो भगवान् दिव्यमंगळ एवेत्यत्र सन्देहः । "यो नादृतो नरकभाग्भिरसत्प्रसंगैरिति" ब्रह्मणैवोक्तत्वात् । महदादिभिः प्रकृतितत्त्वैर्विरचितस्य तद्देहस्य प्राकृतप्रळये लये सति अप्राकृतदिव्यवैष्णवलोके वर्तमानस्य भगवतो देहः कीदृशः । उत्तरम् । अप्राकृत एव । चोद्यम् । तस्मिन्नप्राकृते लोके तादृशाप्राकृतदेहविशिष्टं भगवन्तं ये पश्यन्ति ते प्राकृताः किमुताप्राकृताः । वद सखे । उत्तरम् । तं पश्यन्तोप्यप्राकृता एव । सहर्षं चोद्यम् । सखे त्वमतीव सन्निकृष्टोसि । त्वया वक्तव्यमल्पमेवावशिष्टम् । दिव्यवैष्णवलोकोप्यप्राकृतः । तत्र वसन् भगवानप्यप्राकृतः । तस्य

दिव्यमंगळदेहोप्यप्राकृतः । तत्र ये तं पश्यन्ति तेप्यप्राकृताः । सर्वोपि व्यवहारोप्राकृतः । एवञ्च सर्वस्याप्यप्राकृतत्वाभेदात् प्रकृतिसम्बन्धशून्यं निर्गुणन्निरवयवमद्वैतमिति भवता वक्तव्यम् । सखे कर्मनिष्ठ कर्मळीवासना ततकृततनुभुवनभ्रान्तिकान्तारमृगयार्थं धृतकिरातमूर्तेश्शङ्कराळब्धविजयाय त्रिलोकाधिपेन्द्रादिदेवोपभोग्यखाण्डववनदाहेन प्रत्यगाभिन्नब्रह्मज्ञानाग्निबलदाय सत्वैकतानमनोबुद्ध्यहङ्कारचित्ताख्यश्चेतहयचतुष्टययुक्तदेहरथारूढाय ऐहिकामुष्मिकभोगरूपराष्ट्राणि सत्यान्येवेति यैर्धृतानि तेषां धार्तराष्ट्राणां हननार्थं ब्रह्मज्ञानाग्निदत्तगाण्डीवालंकृतपाणये प्रह्लादनारदजायन्तेयादिभिः प्रतिपादितं मोक्षलक्षणं भागवतं धर्मं स्वाग्रजं युधिष्ठिरमखण्डमण्डलाधिपत्ये स्थापयितुं बद्धकङ्कणायार्ज्जुनाय जीवाय "ज्ञेयं यत्तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते । अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यते । अविभक्तञ्च भूतेषु विभक्तमिव च स्थितम् । ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते" । इत्यादिवाक्यैर्वासुदेवेन परमगुरुणेश्वरेण प्रतिपादितमद्वैतं ब्रह्मैव शुद्धसात्विकसमष्टिविग्रहायोध्यायां श्रीराम इति प्रकाशतेतराम् । तादृशम्महाप्रभुमद्वैतं श्रीरामं यो न पश्यति न जानाति श्रीराम राम रामेति वाचापि न जपति तस्मिन्महद्विरुक्तेपि ब्रह्मैवेति न विश्वासिति स स एव श्वविड्वराहोष्ट्रखरवन्निन्दितः आत्महन्ता चेति

यश्च राममित्ययं श्लोक एव वाल्मीकिरामायणस्याद्वैतप्रतिपादकमान्तरार्थं स्पष्टीकरोति ॥

४२ कर्म—सखे सत्यनिष्ठ रामायणस्यान्तरार्थं वदन्तस्तवाभिमते बाह्यार्थान्तरार्थयोरुभयोरपि सत्यत्वं किं वा बाह्यार्थस्य मिथ्यात्वम् । प्रथमे बाह्यार्थस्य सर्वविदितस्य सत्यत्वादान्तरार्थकथने विशेषप्रयोजनाभावः । द्वितीये पक्षे अयोध्यामिथिलाराज्यजनस्थानपञ्चवटीकिष्किन्धारामेश्वरसेतुबन्धादीनां प्रत्यक्षदृष्टत्वेन बाह्यार्थस्य मिथ्यात्वं न घटतैव । किञ्च वाल्मीकिरामायणे वर्ण्यमानानां सर्वेषां बिषयाणां आन्तरार्थकथनमशक्यमेव । अतस्तवान्तरार्थकथनमयुक्तमेव ॥

सत्य—"अकोविदः कोविदवादवादान् वदस्यथो नातिविदां वरिष्ठः । न सूरयो हि व्यवहारमेतं तत्त्वावमर्शेन सहामनन्ति । तथैव राजन्नरुगार्हमेधवितानविद्योरुविजृम्भितेषु । न वेदवादेषु हि तत्त्ववादः प्रायेण शुद्धो न च कास्ति साधुः" अत्र द्वितीयपद्ये प्रायेणेति प्रायिकत्वग्रहणं परमार्थाद्वैतब्रह्मज्ञानाय चित्तशुद्ध्यापादकवेदोक्तकर्मपरम् । बुद्धे तत्त्वे तच्च हेयमिति श्रुत्यनुशासनम् । सखे कर्मनिष्ठ श्रीमद्भागवततात्पर्यगन्धोपि नाघ्रातस्त्वया । हन्तायमाक्षेपउत्सृष्टमृगशरीरं चरमशरीरेण विप्रत्वं गतं प्रपञ्चव्यवहारस्य सत्यताम्मन्वानाय सिन्धुसौवीरपतये रहूगणाय परमा

र्थतत्वमुपदिशन्तं परमभागवतमार्षभं भरतं प्रति युक्तः । श्रीवाल्मीकिरामायणस्यान्तरंगं को वेद । मायामयस्य स्वप्नप्रायस्याद्वितीये ब्रह्मण्यध्यस्तस्य जगतस्सत्यतां मन्वानं तद्भोगाय कर्माणि कुर्वाणं त्वां बोधयितुमशक्यमेव । "रहूगणैतत्तपसा न याति न चेज्यया निर्वहणाद्गृहाद्वा । न च्छन्दसा नैव जलाग्निसूर्यैर्विना महत्पादरजोभिषेक"मिति तेनैव जायन्तेयेन भरतेनोक्तत्वात् । सखे आन्तरार्थावगमप्रयोजनाय पुरञ्जनोपाख्यानवद्बाह्यार्थमप्यंगीकरोमि । रामायणकर्तृभिः प्रत्यङ्निष्ठैराचार्यैरान्तरार्थस्फोरकतयैव बाह्यार्थस्य वर्णितत्वात् । आदिकाव्येस्मिन् ऋतुगिरिवननदीसमुद्रपुरवर्णनस्य श्रोतृजनमनोरञ्जकत्वात् सर्वविषयान्तरार्थो नापेक्ष्यः । आन्तरार्थमीषदप्यनादृत्य बाह्यार्थस्यैव सत्यत्वे भवादृशानामधिकाह्लादाय क्वाचत् क्वचित् किञ्चित किञ्चिदपि रामायणे वक्तव्यम् । हन्त तर्हि स्मृतं वाल्मीकिमहर्षिणा । तथा हि । प्ररूढगर्भाः पत्नीः प्रसमीक्ष्य राजा दशरथः कियत्पलमितं लशनमानीतवानापणात् प्रसवौषधकृते । पिप्पलीश्च कियतीः । अथवा अग्रिमगर्भे सीमन्तानन्तरं प्रसवाय पितृगृहं गताः किं दशरथपत्न्यः कौसल्यादयः । परमान्नप्राशनालाभाद्दुःखितानां शतत्रयशतार्द्धानां पत्नीनां नामानि कानि । तासां पितरः के । अपि च रामादीनां राजपुत्राणां विवाहे वरणमालानिक्षेपणाय भरतमं

से वोढुन्तन्मातुल आगत एव । यस्मिंस्तु दिवसे राजा च-
क्रे गोदानमंगळम् । तस्मिन्नेव दिने भरतमातुलो युधाजि-
दागत इति विशदमुक्तम् । श्रीरामन्त्वंसे वोढुं तन्मातुल
आगतो वा न वेति न ज्ञायते । ननु कौसल्यासहोदरः कि-
ल कोसलपतिः स कोसलपतिर्दशरथो राममातुलोत्रास्त्येव ।
तर्हि राममातुलागमनं न वक्तव्यम् । दक्षिणोत्तरयोः प्रवृ-
त्तिनिवृत्तिपरमर्त्थं अजानतां दक्षिणकोसलमुत्तरकोसलमिति
राज्यद्वयं परस्परभिन्नमिति वदतामार्याणाम्मते राममातुलाग-
मनं वक्तव्यमेव । लक्ष्मणशत्रुघ्नयोर्मातुलागमनं वक्तुं वि-
स्मृतमेवादिकविना । हा हा बालस्य हि विनोदाय धात्री
वक्ति शुभां कथाम् । इत्यादिवासिष्ठवचनगन्धमप्यनाघ्राय
स्थूलप्रपञ्चसत्यतां मन्वानान् तद्विषयभोगलम्पटान् कश्म-
लविषयासक्तत्वेन श्वविड्वराहोष्ट्रखरैस्सम्मितान् पुरुषपशून्
बोधयितुमशक्यमेवेति मन्वानोहमिदानीं वाल्मीकिरामाय-
णान्तरार्थविवेचनादुपरम्य श्रीराम जय राम जय जय राम
रामेति भजे दाशरथिं परमात्मानं भगवन्तमद्वैतम् ॥

४३ कर्म—सखे सत्यनिष्ठ अनवसितार्त्थपरिपाटी-
भिरनार्त्थिकाभिर्वाग्भिर्गुम्भितेस्मिन् वाल्मीकिरामायणान्तरा-
र्थे प्रयोजनं किम् । प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते ।
तस्मात् द्वैतविशिष्टाद्वैतमतनिन्दनं सकामकर्मपराणामार्या-
णान्निन्दनञ्च प्रयोजनमिति सुस्पष्टं भाति । "परस्वभावक-

र्माणि नं प्रशंसेन्न गर्हयेत् । विश्वमेकात्मकं पश्यन् प्रकृ-
त्या पुरुषेण चे"ति एकादशस्कन्धे उद्धवं प्रति भगवद्व च-
नं जानतस्सत्यनिष्ठस्य तवेदमनुचितमेव ॥

सत्य—सखे कर्मनिष्ठ तवेममुपदेशं शिरसा वहं-
स्तुष्यामि.। द्वैतविशिष्टाद्वैतमतनिन्दनं सकामकर्मपराणां के-
षाञ्चिदार्याणान्निन्दनञ्च प्रयोजनमिति यत्त्वदुक्तं तन्न । प्र-
योजनन्तु वाल्मीकिरामायणस्याद्वैतप्रतिपादकतया सहृदय-
हृदयाह्लादक आन्तरार्थोस्तीति मामकीनचित्ततोषणमेव । न
खेव द्वैतविशिष्टाद्वैतमतनिन्दनं सकामकर्मपराणां केषाञ्चि-
दार्याणां निन्दनं वा । द्वैतविशिष्टाद्वैतमतयोरप्यस्माभिः प-
रमार्थाद्वैततत्वज्ञानसाधनत्वेनांगीकृतत्वात् । "कर्मण्येवाधि-
कारस्ते मा फलेषु कदाचने" ति भगवदुक्तप्रकारेण वेदोक्त-
निष्कामकर्मानुष्ठाने रुचिजनकतया सकामकर्मणोप्यस्माभि-
रंगीकृतत्वाच्च । किञ्च वाल्मीकिरामायणान्तरार्थविवरणे
अद्वैतप्रतियोगिकद्वैतविशिष्टाद्वैतमतनिन्दनं सकामकर्मपरा-
णां केषाञ्चिदार्याणान्निन्दनञ्च प्रसज्येते। तन्निन्दनात्मको दोषो
मयि नारोप्यः । किन्तु "अवज्ञातं सदद्वैतं निश्शंकैरन्यवा-
दिभिः । एवं का क्षतिरस्माकं तद्वैतमवजानतां । द्वैतावज्ञा
सुस्थिता चेदद्वैता धी स्थिरा भवेत् । स्थैर्यं तस्याः पुमाने-
व जीवन्मुक्त इतीर्यते" । इति वदत्सु भारतीतीर्थविद्यारण्या-
दिपूर्वाचार्येषु "पुमांसापैति यत् गत्वा बिलस्वर्गं गतो यथा।

प्रत्यग्धामाविद इह किमसत्कर्मभिर्भवेत्" । इति । "हे लोका! विष्णुरेतद्भुवनमजनयत्तन्न जानीथ यूयं युष्माकं ह्यन्तरस्थं किमपि तदपरं विद्यते विष्णुरूपं । नीहारप्रख्य-मायापरिवृतमनसो मोहिता नामरूपैः प्राणप्रीत्यैकतृप्ताश्चरथ मखपरा हन्त नेच्छामुकुन्दे" । इति च वदत्सु परमभागवतेषु च युक्तः । अपि चानवसितार्थपरिपाटीभिरनार्थिकाभिर्वाग्भिर्गुम्फितोयमान्तरार्थ इति यदुक्तं तत्र अवसितार्थपरिपाट्यस्सार्थिका वाचः काः । वद सखे । श्रीवाल्मीकिरामायणस्य सर्वजनविदितबाह्यार्थविषया वाच्च एवेति चेत् दशरथाहल्यायोध्याशतानन्दगुहविराधकिष्किन्धासंपातिदशाननकुंभकर्णविभीषणादीनां सर्वेषामादिकाव्योक्तपदानामभिधानार्थमुक्त्वा बाह्यार्थविषयाणां वाचामवसितार्थपरिपाटीत्वं सार्थकत्वञ्च वक्तव्यं । सखे सीताविवाहात् पूर्वं शैवकोदण्डानयने तद्वनुर्मञ्जूषा अष्टचक्रेति तद्वाहकाः पुरुषाः पञ्चसहस्रमिति चोक्तं । तत्र भवन्मते मञ्जूषा अष्टचक्रेति पञ्चसहस्रसंख्याः पुरुषा वाहका इति च कथमवसितार्थपरिपाटीत्वमागतं ब्रूहि सखे । मञ्जूषायाः अष्टचक्रघटितत्वादतिमात्रं गरीयस्त्वाच्चेति तवान्ते शरणं नं [illegible] सितार्थपरिपाटीत्वं । अस्मदभिमतान्तरार्थे तु जगत्यस्मिन् सर्वन्त्रैगुण्यविषयं खलु शैवन्धनुः । [illegible] मञ्जूषायाः "भूमिरापोनलो वायुः ख [illegible] बुद्धिरेव च [illegible]

हंकार इतीयम्मे भिन्ना प्रकृतिरष्टधे" ति गीतावचनप्रमाणेन कोदण्डनिक्षेपमञ्जूषा अष्टचक्रेति शब्दादिपञ्चविषयात्मक-त्रैगुण्यविषयकोदण्डानयने वृत्तिभेदेन सहस्रधा भिन्नानि श्रोत्रादिज्ञानेन्द्रियाण्येव नृणां शतानि पञ्चाशदिति च समीचीनमेवावसितार्थपरिपाटीलं सार्थकत्वञ्च । आन्तरार्थमनादृत्य बाह्यार्थस्यैव सत्यतां मन्वानानामार्याणां वाच एवानवसितार्थपरिपाट्यः अनर्थिकाश्च । किं बहुना । अस्मदुक्तान्तरार्थप्रत्यर्थिनिकरनिराकरणाय। राममिन्दीवरश्यामं राजीवायतलोचनं । ज्याघोषनिर्ज्जितारातिं जानकीरमणं भजे । अनेन भजनेनैव सर्वमनाविलमित्याशासे सर्वेषां मंगळम् ॥

समाप्तेयं वाल्मीकिरामायणान्तरार्थदीपिका ॥

कष्टिक्कोट्टै तळि श्रीभागवतपौराणिकः । अय्यात्तुरैशास्त्री ॥

कुड्यपुस्तकसूची

	[illegible]मतसञ्जीवनी [अय्यात्तुरैशास्त्री]	१	०
	[illegible]कापुराणं [वेदव्यासः]	०	१२
३	तुरीयसहृदयसमागमः [नीलकण्ठवासुदेवशर्माणौ]	०	१०
४	भवभूतिभारती [कविभूषणः]	०	१०
५	सांबव्रतकल्पः [कुप्पाभट्टसंस्कृतः]	०	८
६	ललितासहस्रनामस्तोत्रम् [हयग्रीवागम्यप्पवादः]	०	८
७	सुभद्राहरणचम्पुकाव्यं [नारायणभट्टपादः]	०	६
८	पाञ्चालीस्वयम्बरचम्पुकाव्यम् ,,	०	६
९	चन्द्रिकावीथी [रामपाणिवादः]	०	४
१०	उदयचरित्रकाव्यं [शंकरपारशवः]	०	४
११	अध्वयानवर्णनं [रामस्वामिशास्त्री]	०	२
१२	सुभाषिततरङ्गिणी [कुमारतातार्यकविभूषणः]	०	२
१३	शाकुन्तळपारम्यं [केरळवर्मदेवः]	०	२
१४	शारिकाप्रश्नोत्तरमालिका [कविपञ्चकम्]	०	२
१५	पादुकास्तुतिः [कुमारतातार्यः]	०	२
१६	शिवस्तोत्रं [करुणाकरमेनवः]	०	२
१७	श्रीरामोदन्तकाव्यं	०	१
१८	संवादविंशतिः [नीलकण्ठवासुदेवौ]	०	१
१९	त्रिक्षमा [वासुदेवनारायणौ]	०	१
२०	ललितास्वादण्डकं [केरळवर्मदेवः]	०	१